# महा गनपति (चतुर्ति or invocation) पूजा

***NOTE: WHAT EVER STEP INDICATED AS MANDATORY, PLEASE DO NOT SKIP. WHATEVER MANTHRA GIVEN IN THIS DARK TEAL COLOUR IS MANDATORY AND PLEASE CHANT SO AS TO MAKE YOUR POOJA TO BE ELIGIBLE TO BECOME A POOJA!!***

***Those who want to do elaborate poorvaanga pooja, and uththara pooja, please refer the document "POOJA Vidhi poorvaanga pradhaana uththara pooja"***

PLEASE free to send corrections, modifications, upgrades or your commenst to samynarayana@gmail.com

## PART 1: INITIAL POOJAS: The following are as in

============================ =STA RT=====================================

नूतन यज्ञोपवीत धारण मन्त्रः See a separate document
============================ ==========================================

प्रात / सायम् संद्यावन्दनं See a separate document
============================ ==========================================

दीप स्थापना (lighting the lamp
============================ ==========================================

## आचम्य । (Mandatory)

take one drop of water 3 times chanting केशवा। नारायणा । माधवा।

Leave a drop of water on the platre / ground chanting गोविन्दा

right thumb on right cheek विष्णो। right thumb on left cheek मधुसूदना।

folded fingers on chin त्रिविक्रमा। right palm on left plam वामना । left palm on right palm श्रीधरा। touch right knee ऋषिकेशा। touch left knee पद्मनाभा touch head दमोदकरा

fingers folded under nose सङ्कर्षणा। touch right nose वासुदेवा। touch left nose प्रद्युम्ना।
touch right ear अनिरुद्धा। touch left ear पुरुषोत्तमा। touch right eye अधोक्षय।
touch left eye नृसिंहा। touch naval अच्युता touch chest जनार्दना।
touch forehead उपेन्द्रा। namaskaram posture श्रीहरे। kavacham posture श्रीकृष्णा
============================== ==============================================

## ध्यानम् (Dhyanam) + अनुज्ञा (permission to perform pooja from dEvathAs

ॐ इष्टदेवताभ्यो नमः | ॐ कुलदेवताभ्यो नमः | ॐ स्थानदेवताभ्यो नमः |
ॐ ग्रामदेवताभ्यो नमः| श्री सरस्वत्यै नमः | श्री वेदाय नमः
ॐ उमामहेश्वराभ्यां नमः | ॐ मातापितृभ्यां नमः | ॐ सर्वेभ्यो गुरुभ्यो नमः।
ॐ सर्वेभ्यो देवेभ्यो नमो नमः | ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः |
येतद्कर्म प्रधान देवताभ्यो नमो नमः || प्रारम्भ कार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्ट देवता कुलदेवता सुप्रसन्ना वरदा भवतु ॥ अनुज्ञां देहि ॥ ॐ शान्तिः शान्तिः शान्तिः ॥
============================== ==============================================

अनुज्ञा (Mandatory) (permission to perform pooja from dEvathAs

ऋद्ध्यास्मं हव्यैर्नमंसोपसद्यं। मित्रं देवं मित्रधेयं नो अस्तु। अनूराधान् हविषां वर्धयंन्तः। शतं जीवेम शरदः सवीराः।
॥ अनुज्ञां देहि ॥ ॐ शान्तिः शान्तिः शान्तिः ॥
============================== ==============================================

## वेदादयः

हरिः ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ हरिः ॐ

हरिः ॐ इषे त्वोर्जेत्वा वायवस्थो पायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ हरिः ॐ

हरिः ॐ अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥ हरिः ॐ

हरिः ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥ हरिः ॐ
============================== ==============================================

## भूमि प्रार्थना Bhoomi praarTHana

महीध्यौः  पृथिवी च न  इमं  यज्ञं  मिमिक्षतां पिप्रतान्नो  भरीमभिः॥  भूतोत्सारणम्

अप सर्पन्तु ते भूता ये भूता भूमि संस्थिताः । ये भूता विघ्न कर्तारः ते नश्श्यन्तु शिवाज्ञया ॥

अपक्रामन्तु भूतानि पिशाचास्सर्वतो दिशम्। सर्वेषाम् अविरोधेन पूजाकर्म समारभे ॥

============================ ==========================================

## इन्द्रियस्पर्श मन्त्राः **(Indriya sparsha mantra – touching each organ with a mantra)**

ॐ वाङ्ग आस्येऽस्तु | (speaking ability- tongue)     ॐ नसोर्मे प्रणोऽस्तु |  (breathing ability Nose)

ॐ अक्ष्णोर्मे चक्षुरस्तु |(seeing ability- eyes) ॐ कर्णयोर्मे श्रोत्रमस्तु |(hearing ability- ears)

ॐ बाह्वोर्मे बलमस्तु |(strength - shoulders) ॐ उर्वोर्मे ओजोऽस्तु |(digesting ability- stomach)

ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु | पारस्कर गृह्यसूत्रम् |     कण्डिका ३ | सू|| २५

============================ ==========================================

## धान्य राशि Dhaanya rasi

ॐ औषधाय सम्वदम्ते सोमेन सहराज्ञ | यस्मै कृणेति ब्राह्मणस्थम् राजन् पारयामसि  ||

(Touch the grains/rice/wheat. Dhanya is basic nourishing fertility for the body

============================ ==========================================

## ध्रुवं धा॑रय मन्त्रा Dhruvam dhaaraya - stability

ॐ ध्रु॒वं ते॒ राजा॒ वरु॑णो ध्रु॒वं दे॒वो बृह॒स्पतिः॑ । ध्रु॒वन्त॒ इन्द्र॑श्चा॒ग्निश्च॑ रा॒ष्ट्रं धा॑रयतां ध्रु॒वम् ॥

============================ ==========================================

## ***गणपति स्तुति*** । (Mandatory)

ॐ  शुक्ल अम्बरधरं  विष्णुं  शशिवर्णं  चतुर्भुजम्  । प्रसन्नवदनं  ध्यायेत् सर्वविघ्नोऽपशान्तये   ॥ (one who is wearing white clothes, colour as moon, four shoulders, pleasing (to see)countenance  I meditate upon him.  Lat all impediments / obstacles be removed by you)

============================ ==========================================

## ***प्रोक्षणं*** (Mandatory) (शरीर शुद्धि) Cleaning / puroification

(Cleanse yourself mentally by sprinkling drops of water on your head and body and around yourself)

ॐ अपवित्रः पवित्रो वा सर्व अवस्थां गतोअपी वा | यः स्मरेत पुण्डरीकाक्षं सबाह्य अभ्यन्तरः शुचिः !! (The moment I think of Pundareekaksha , all impurities turn to pure, all states (of mind ignorance sleep wisdom, awakeneing) disappears, every thing becomes pure0
============================= ==========================================

## *प्राणायामम्।*

ॐ भूः ॐ भुवः ॐ सुवः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ।
ॐ तत्संवितुर्वरेँण्यं भर्गोदेवस्यं धीमहि । धियो यो नंः प्रचोदयांत् ॥
============================= ==========================================

## पवित्र धारणम् ।

पवित्रं धृत्वा (wear 2 starnd puja pavitram on right had ring finger)
दर्भान् धारय मानः (keep a few dharbam under your ring finger but going up on middle and little fingers)
दर्भेष्वासीनः (keep few dharbam on the plaace where you are sitting)
============================= ==========================================

## *स्तल सुध्धि मन्त्रा (mandatory)*

*[For this purpose, keep water in kumbam or pancha pathram or at last a brass vessel Chant the following manthras to invoke blessing & purification power of of varuna dEvatha in water.*

ॐ तच्छं योरावृंणीमहे । गातुं यज्ञायं। गातुं यज्ञपंतये । दैवींस्स्वस्तिरंस्तु नः ।
स्वस्तिर्मानुंषेभ्यः । ऊर्ध्वं जिंगातु भेषुजम् । शन्नों अस्तु द्विपदें। शं चतुंष्पदे ।
ॐ शान्तिश्शान्तिश्शान्तिंः ।

***This is good enough. You can sprinkle water chanting the following manthra on self, pooja sthalam, pooja dravia , pooja ppaathra, pooja peeta, aasana etc.***

ॐ अपवित्रः पवित्रो वा सर्व अवस्थां गतोअपी वा| यः स्मरेत पुण्डरीकाक्षं सबाह्य अभ्यन्तरः: शुचिः॥
============================= ==========================================

## गणेश पूजा करन्यासः

गणक ऋषिः । निचृद्गायत्री छन्दः । विनायको देवता । ह्लो बीजानि ।

स्वराः शक्तयः । सर्वेष्टसिद्धये

ॐ गाँ अंगुष्ठाभ्यायां नमः ॐ गीँ तर्जनीभ्यां नमः| ॐ गूँ मध्यमाभ्यां नमः |

ॐ गैँ अनामिकाभ्यां नमः | ॐ गौँ कनिष्ठिकाभ्यां नमः | ॐ गः कनिष्ठिकाभ्यां नमः |

ॐ करतलकरपृष्ठाभ्यायां नमः

==================== ========================================

## गणेश पूजा अङ्ग न्यासं

ॐ गाँ हृदयाय नमः । ॐ गीँ शिरसे स्वाहा । ॐ गूँ शिखायै वषट् ।

ॐ गैँ कवचाय हुँ । ॐ गौँ नेत्रत्रयाय वौषट् । ॐ गः अस्त्राय फट् ।

========================== ========================================

## दिक् देवता प्रार्थना ॥ *praying to devatha guarding each direction and seeking protection)*

ॐ प्राची दिगग्निरधिपतिरसितो रक्षितादित्या इषवः|तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु | योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः||

ॐ दक्षिणा दिगिन्द्रोऽधिपतिस्तिरश्चिराजी रक्षिता पितर इषवः|तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु | योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः||

ॐ प्रतीची दिग्वरुणोऽधिपतिः पृदाकू रक्षितान्नमिषवः | तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु | योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः||

ॐ उदीची दिक् सोमोऽधिपतिः स्वजो रक्षिताऽशनिरिषवः| तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु | योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः||

ॐ ध्रुवा दिग्विष्णुरधिपतिः कल्माषग्रीवो रक्षिता वीरुध इषवः|तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु | योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः||

ॐ ऊर्ध्वा दिग्बृहस्पतिरधिपतिः श्वित्रो रक्षिता वर्षमिषवः| तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु | योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ||

उपस्थानमन्त्राः

ॐ उद्वयन्तमसस्परि स्वः पश्यन्त उत्तरम् | देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ||

ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥

ॐ चित्रं देवानामुद्गादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।आप्रा द्यावापृथिवी अन्तरिक्ष~म् सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा ॥

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं । जीवेम शरदः शतम्। शृणुयाम शरदः शतं। प्रब्रवाम शरदः शतं ।अदीनाः स्याम शरदः शतं । भूयश्च शरदः शतात् ॥

============================ ==========================================

## द्वारपालक पूजा ॥

| | | |
|---|---|---|
| ॐ क्षेत्रपालाय नमः। | ॐ सिंहाय नमः। | ॐ गरुडाय नमः। |
| ॐ द्वारश्रियै नमः। | ॐ धात्रै नमः। | ॐ विधात्रै नमः। |
| ॐ पूर्वद्वारश्रियै नमः। | ॐ शङ्खनिधये नमः। | ॐ पुष्पनिधये नमः। |
| ॐ दक्षिणद्वारश्रियै नमः। | ॐ बलायै नमः। | ॐ प्रबलायै नमः। |
| ॐ प्रचण्डायै नमः। | ॐ पश्चिम द्वारश्रियै नमः। | ॐ जयायै नमः। |
| ॐ विजयायै नमः। | ॐ गङ्गायै नमः। | ॐ यमुनायै नमः। |
| ॐ उत्तरद्वारश्रियै नमः। | ॐ ऋग्वेदाय नमः। | ॐ यजुर्वेदाय नमः। |
| ॐ सामवेदाय नमः। | ॐ अथर्वणवेदाय नमः। | ॐ कृतयुगाय नमः। |
| ॐ त्रेतायुगाय नमः। | ॐ द्वापरयुगाय नमः। | ॐ कलियुगाय नमः। |
| ॐ पूर्वसमुद्राय नमः। | ॐ दक्षिणसमुद्राय नमः। | ॐ पश्चिमसमुद्राय नमः। |
| ॐ उत्तरसमुद्राय नमः। | ॐ द्वारदेवताभ्यो नमः। | ॐ ब्रह्मणे नमः। |
| ॐ विष्णवे नमः। | ॐ गङ्गायै नमः। | ॐ गणपतये नमः। |
| ॐ षण्मुखाय नमः। | ॐ भृङ्गिनाथाय नमः। | ॐ क्षेत्रपालाय नमः। |
| ॐ त्रिपुरसंहर्त्रे नमः। | ॐ शान्तिये नमः। | ॐ तुष्टिये नमः। |
| ॐ ज्ञानाय नमः। | ॐ धर्माय नमः। | ॐ वैराग्याय नमः। |
| ॐ वीर्याय नमः। | ॐ सत्याय नमः। | ॐ अज्ञानाय नमः। |
| ॐ अधर्माय नमः। | ॐ अनैश्वर्याय नमः। | ॐ असत्याय नमः। |

ॐ अविराज्ञाय नमः। ॐ सत्त्वाय नमः। ॐ रजसे नमः।
ॐ तमसे नमः। ॐ मायाय नमः। ॐ पद्माय नमः ॥
द्वारपालकपूजां समर्पयामि ॥

ॐ पूर्वद्वारे द्वारश्रियै नमः– ॐ धात्रे नमः। ॐ विधात्रे नमः॥ असिन्ताङ्ग भैरवाय नमः। रुरु भैरवाय नमः।

ॐ दक्षिणद्वारे द्वारश्रियै नमः– ॐ जयाय नमः। ॐ विजयाय नमः॥ चण्ड भैरवाय नमः। क्रोध भैरवाय नमः।

ॐ पश्चिमद्वारे द्वारश्रियै नमः– ॐ चण्डाय नमः। ॐ प्रचण्डाय नमः ॥ उन्मत्तभैरवाय नमः। कपाल भैरवाय नमः।

ॐ उत्तरद्वारे द्वारश्रियै नमः– ॐ नन्दाय नमः। ॐ सुनन्दाय नमः ॥ भीषणभैरवाय नमः। संहार भैरवाय नमः।

ॐ ऊर्ध्वद्वारे द्वारश्रियै नमः ॐ आकाशाय नमः। ॐ अन्तरिक्षाय नमः ॥
ॐ अधोद्वारे द्वारश्रियै नमः - ॐ भूम्यै नमः। ॐ पातालाय नमः ॥
ॐ पूर्वे धर्माय नमः। ॐ दक्षिणे ज्ञानाय नमः। ॐ पश्चिमे वैराग्याय नमः।
ॐ उत्तरे ऐश्वर्याय नमः ॥

============================ ==========================================

## 23 आसन पूजा॥ (Touch the AAsanam on which you are sitting)

आसनस्य महामन्त्रस्य पृथिव्या मेरुपृष्ठ ऋषिः। सुतलम् छन्दः। कूर्मो देवता। आसने विनियोगः ॥
पृथ्वि त्वया धृता लोका त्वं विष्णुना विधृता करे।त्वं च धारय मां देवि पवित्रं कुरु च आसनं ॥

अर्चनः।

ॐ योगायसनाय नमः। ॐ वीरासनाय नमः। ॐ शरासनाय नमः।
ॐ आधारशक्ति कमलासनाय नमः ॥ इति पुष्पाक्षतैः आसनमभ्यर्च्य।

============================ ==========================================

## कलश पूजा (Some manthras mandatory)

**संकल्पं sankalapam**



तत्वायामि शुनः शेपोः वरुण त्रिष्टुप् कलशे वरुणावाहने विनियोगः ||

**कलश स्थापना Kalasa sthaapanam**

**If paavamaaneya / varuNa / udhaka shaanthi japam was done and kalasam already established _ SKIP THIS STEPS 24.2, 24.3 24.4 and pray to that kalasam already established.**

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते उक्तैर्यज्ञेषु वर्धते || (keep kalasha on top of rice pile)

फलपुष्पपत्रादिना मण्टपमलङ्कृत्य तन्मध्ये तण्डुलानि स्थापयेत्। तदुपरि चित्रवर्णेन अष्टदलपद्मं लिखित्वा तन्मध्ये प्रक्षालितं स्वर्ण रजत ताम्र मृण्मयाद्यन्यतम पात्रं धूपादिना विशोध्यसम्स्थाप्य वस्त्रेणाऽच्छाद्य तत्कलशान्तराले पञ्चफल पञ्चपल्लव स्वर्णरचित दुर्गा प्रतिमां गोधूम धान्योपरि कलशे स्थापयेत्

ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ॥ [ भूमिं स्पृष्ट्वा ]

ॐ ओषधयः सं वदन्ते सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥ ॐ आ कलशेषु धावति श्येनो वर्म वि गाहते। अभि द्रोणा कनिक्रदत् ॥ [ इति कलशमभिमन्त्र्य ]

ॐ तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान्। अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम् ॥ [ इति सूत्रं सम्वेष्ट्य

ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया ॥ इति जलं सम्पूर्य (fill kalasha with water)

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः | आहेलमानो वरुणः बोध्युरुशं समान आयुः प्रमोषिः ||

अस्मिन् कलशे ॐ भूः वरुणमावाहयामि। ॐ भुवः वरुणमावाहयामि। ॐ स्वः वरुणमावाहयामि। ॐ भूर्भुवस्स्वः वरुणमावाहयामि ॥

ॐ स हि रत्नानि दाशुषे सुवाति सविता भगः। तं भागं चित्रमीमहे ॥ इति पञ्चरत्नानि निधाय

ॐ अ॒श्व॒त्थे वो॑ नि॒षद॑नं प॒र्णे वो॑ वस॒तिष्कृ॒ता। गो॒भाज इत्किला॑सथ॒ यत्स॒नव॑थ॒ पूरु॑षम् ॥ इति पल्लवान् निक्षिप्य

ॐ पू॒र्णा द॑र्वि॒ परा॑ पत॒ सुपू॑र्णा॒ पु॒नरा॑पत। व॒स्नेव॒ वि क्री॑णावहा॒ इ॒षमूर्ज॑ँ शतक्रतो ॥ इति दर्वीं निक्षिप्य

ॐ याः फ॒लिनी॒र्या अ॑फ॒ला अ॑पु॒ष्पा याश्च॑ पु॒ष्पिणीः॑। बृह॒स्पति॑प्रसूता॒स्ता नो॑ मुञ्च॒न्त्वंह॑सः ॥ इति फलं समर्प्य

ॐ भूर्भुवःस्वः वरुणाय नमः | ॐ गन्ध॑द्वा॒रां दु॑राध॒र्षां नि॒त्यपु॑ष्टां करी॒षिणी॑म्। ई॒श्व॒रीं॒ सर्व॑भूतानां॒ तामि॒होप॑ह्वये॒श्रिय॑म् ॥ *(sprinkle in/apply ga.ndha to kalasha)* श्रीकलशाय नमः। दिव्यगन्धान्धारयामि ॥

ॐ भूर्भुवःस्वः | वरुणाय नमः | हरिद्रा कुङ्कुमं समर्पयामि

ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि |बृहस्पति प्रसोतास्थानो मञ्चत्वं हसः ||

*(put beetle nut in kalasha)*

ॐ सहिरत्नानि दाशुषेसुवाति सविता भगः |तंभागं चित्रमीमहे || (put jewels / washed coin in kalasha)

ॐ हिरण्यरूपः हिरण्य सन्द्रिग्पान्न पात्स्येदु हिरण्य वर्णः |हिरण्ययात् परियोनेर्निषद्या हिरण्यदा ददत्थ्यन् नमस्मै || *(put gold / daxina in kalasha)*

ॐ कान्डात् कान्डात् परोहंति परुषः परुषः परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च || (put duurva / karika )

ॐ अश्वत्थेवो निशदनं पर्णेवो वसतिश्कृत |गोभाज इत्किला सथयत्स नवथ पूरुषम् || (put five leaves in kalasha)

ॐ युवासुवासः परीवीतागात् स उश्रेयान् भवति जायमानः |तं धीरासः कावयः उन्नयंति स्वाद्ध्यो स्वाद्ध्यो मनसा देवयंतः || (tie cloth for kalasha)

ॐ पूर्णादर्वि परापता सुपूर्णा पुनरापठ |वस्नेव विक्रीणावः इषमूर्जं शतकृतो ||(copper plate and aShTadala with ku.nkuM)

ॐ भूर्भुवःस्वः | वरुणाय नमः | ॐ अर्च॑त॒ प्रार्च॑त॒ प्रिय॑मेधा सो॒ अर्च॑त। अर्च॑न्तु पु॒त्रका उ॒त पुरं॒ न धृ॒ष्णव॑र्चत ॥ इत्यक्षतान् निक्षिप्य ||(add to kalasha)

ॐ आयंने ते परायंणे दूर्वा रोहन्तु पुष्पिणीः। ह्रदाश्चं पुण्डरीकाणि समुद्रस्यं गृहा इमे ॥ इति पुष्पाणि समर्पयेत्

ॐ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः।अतंप्तनूर्न तदामो अंश्नुते शृतास इद्वहंन्तस्तत्समांशत ॥ इति शिरःकूर्चं निधाय

ॐ तत्त्वायामीत्यस्य मन्त्रस्य शुनःशेप ऋषिः त्रिष्टुप् छन्दः वरुणो देवता कलशे वरुणावाहने विनियोगः ॥ ॐ तत्त्वां यामि ब्रह्मंणा वन्दंमानस्तदा शांस्ते यजंमानोहविर्भिः। आहेंळमानो वरुणेह बोध्युरुंशम्समान आयुः प्रमोंषीः ॥ इति अभिमन्त्रयेत्

**इति कलशं प्रतिष्ठापयामि || सकल पूजार्थे अक्षतान् समर्पयामि ||**

### कलश पूजा **Kalasza pooja**

[कलशं गन्धाक्षत पत्र पुष्पैरभ्यर्च्य परिमलद्रव्याणि निक्षिप्य कलशं हस्तेनाच्छाद्य

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथयजुर्वेदः सामवेदोऽप्यथर्वणः ॥

अङ्गैश्च सहिताः सर्वे कलशाम्बु समाश्रिताः। अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ॥

आयान्तु देवीपूजार्थं दुरितक्षयकारकाः। सर्वे समुद्राःसरितस्तीर्थानि जलदा नदाः ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः। आयान्तु गुरुपूजार्थं दुरितक्षयकारकाः ॥

देवदानवसंवादे मथ्यमाने महोदधौ | उत्पन्नोऽसि तदा कुम्भ | विधृतो विष्णुना स्वयम् ||

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः | त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ||

शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः | आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ||

त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः | त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव |

सांनिध्यं कुरु मे देव प्रसन्नो भव सर्वदा ||

ॐ आपो वा इद९ सर्वं विश्वां भूतान्यापंः। प्राणा वा आपंः पशव आपोऽन्नमापोऽमृतमापंस्सम्राडापों विराडापं स्स्वराडापश्छन्दा९ स्यापो ज्योती९ ष्यापो यजू९ ष्यापंस्सत्यमापस्सर्वा देवता आपो भूर्भुवस्सुवराप ॐ ॥

ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचतापरुष्णिया असिक्निया मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्राम्। करधृतकलशोद्यत्सोत्पलाभीत्यभीष्टाम् ॥

विधिहरिहररूपां सेन्दुकोटीरचूडाम्। कलितसितदुकूलां जाह्नवीं तां नमामि ॥

[गायत्र्या दक्षिणामूर्तिमूलेन च दशवारमभिमन्त्र्य -कलशमुखे पुष्पाणि निक्षिप्य - कलशोदकेन आत्मानं

सर्वोपकरणानि च प्रोक्षयेत्]

[कलशोदकेन भूर्भुवस्सुवरोऽमिति शङ्खं प्रक्षाळ्य -

चक्रमुद्रां प्रदर्श्य - गायत्र्या दक्षिणामूर्तिमूलेन च शङ्खं कलशजलेनापूर्य - धेनुमुद्रां प्रदर्श्य - परिमलद्रव्याणि

निक्षिप्य - गन्धाक्षतपत्रपुष्पैः समभ्यर्चयेत्]

शङ्खमूले ब्रह्मणे नमः। शङ्खमध्ये जनार्दनाय नमः।

शङ्खाग्रे चन्द्रशेखराय नमः ॥ ॐ कलश देवताभ्यो नमः गन्धान् धारयामि।

गन्धस्योपरि हरिद्राकुङ्कुमं धारयामि। ॐ कलश देवताभ्यो नमः अक्षतान् समर्पयामि।

ॐ कलश देवताभ्यो नमः पुष्पैः पूजयामि। कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।

मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्त द्वीपा वसुन्धराः।

ऋग्वेदोऽयजुर्वेदः सामवेदोह्यथर्वणः ॥ गङ्गेच यमुनेश्चैव गोदावरी सरस्वति।

नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु ॥ अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः।

अत्र गायत्री सावित्री शान्ति पुष्टिकरी तथा ॥ आयान्तु सपरिवारः श्री हरिहरपुत्र पूजार्थं दुरितक्षयकारकाः ॥

अर्चनः।

ओं गङ्गायै नमः। यमुनायै नमः। गोदावर्यै नमः। सरस्वत्यै नमः।

नर्मदायै नमः। सिन्धवे नमः। कावेर्यै नमः। पुष्पाणि पूजयामि ॥

अस्मिन् कलशे गङ्गादि सप्ततीर्थाणि आवाहयामि ॥

गन्धपुष्प धूपदीपैः सकलाराधनैः स्वर्चितं ॥

ॐ सितासिते सरिते यत्र सङ्गथे तत्राप्लुतासो दिवमुत्पतन्ति।

ये वैतन्वं विसृजन्ति धीरास्ते जनसो अमृतत्त्वं भजन्ति ॥

ॐ भूर्भुवःस्वः | वरुणाय नमः | धूपं समर्पयामि ||

ॐ भूर्भुवःस्वः | वरुणाय नमः | दीपं समर्पयामि ||

ॐ भूर्भुवःस्वः | वरुणाय नमः | नैवेद्यं समर्पयामि ||

ॐ भूर्भुवःस्वः | वरुणाय नमः |सकल राजोपचारार्थे अक्षतान् समर्पयामि ||

अवते हेळो वरुण नमोभिरिव यज्ञेभिरीमहे हविर्भिः |

क्षयं नमस्मभ्यं सुरप्रचेता राजन्नेनाम्सि शिश्रथः कृतानि || वरुणाय नमः | मन्त्र पुष्पं समर्पयामि ||

प्रदक्षिणा नमस्कारान् समर्पयामि || अनया पूजया भगवान् श्री महा वरुण प्रियताम् ||

सकल पूजार्थे अक्षतान् समर्पयामि ||

कलशः प्रार्थनाः **Kalasza praarthana**

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम्। योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥

सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः। अथः हरिप्रियोसि त्वं पूर्णकुम्भं नमोऽस्तुते ॥

कलशदेवताभ्यो नमः। सकल पूजार्थे अक्षतान् समर्पयामि ॥

============================ ==========================================

# दिग्पालक पूजा॥

*( Start from east of kalasha or deity)*

इंद्राय नमः ||अग्नये नमः ||यमाय नमः || नैऋतये नमः ||वरुणाय नमः ||वायव्ये नमः || कुबेराय नमः ||ईशानाय नमः || इति दिग्पालक पूजां समर्पयामि ||

============================ ==========================================

# नवग्रह प्रार्थनः

आदित्याय च सोमाय मङ्गलाय बुधाय च गुरु शुक्र शनिभ्यश्च राहवे केतवे नमः॥

============================ ==========================================

## नक्षत्र देवता प्रार्थना॥

सर्व नक्षत्र देवताभ्यो नमोनमः | सर्व नक्षत्र देवगणाभ्यो नमोनमः | सर्व नक्षत्र देवता पत्नियोः नमोनमः| सर्व नक्षत्र देवगण पत्नियोः नमोनमः| सर्व नक्षत्र देवता अनुग्रह नाम् प्राप्तिरस्तु || अनया पूजया नक्षत्र देवता प्रियताम्

============================ ==========================================

## अष्टदल देवता पूजन ||

ॐ इंद्राय नमः | अग्नये नमः | यमाय नमः | नैऋतये नमः | वरुणाय नमः | वायवे नमः | कुबेराय नमः | ईशानाय नमः |

============================ ==========================================

## चतुर्दल देवता ||

ॐ गणपतये नमः | ॐ दुर्गायै नमः | ॐ क्षेत्रपालाय नमः | ॐ वसोष्पतये नमः | रव्यादि नवग्रह अष्टदल चतुर्दलेषु स्थित सर्वदेवताभ्यो नमः |

============================ ==========================================

## षट् पात्र पूजा

*put tulasi leaves or axatAs in empty vessels)*

वायव्ये अर्घ्यम् | नैऋत्ये पाद्यम् | ईशान्ये आचमनीयम् | आग्नेये मधुपर्कम् | पूर्वे स्नानीयम् | पश्चिमे पुनराचमनम् |

============================ ==========================================

## घण्ट पूजा ॥(Some manthras mandatory)

(Pour drops of water from sha~Nkha on top of the bell apply gandha, *kumkuma*, flower)

घण्टास्थिताय गरुडाय नमः |

ओं। जयध्वनि मन्त्रमातः स्वाहा।

ॐ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुवं विश्वमिदं जगंध्रुवो राजा विशामयम् ॥

ॐ येभ्यो माता मधुमत्पिन्वते पयः पीयूषं द्यौअदितिरद्रिबर्हाः। उक्तशुंष्मान्वृषभरान्त्स्वप्नसस्ता आदित्या अनुमदा स्वस्तये ॥

ॐ ए॒वा पि॒त्रे वि॒श्वदे॑वाय॒ वृष्णे॑ य॒ज्ञैर्वि॑धेम॒ नम॑सा ह॒विर्भिः॑। बृह॑स्पते सु॒प्र॒जा वी॒रव॑न्तो व॒यं स्या॑म॒ पत॑यो र॒यीणा॑म् ॥

आगमार्थं तु देवानां गमनार्थं तु राक्षसां। घण्टारवं करोंयादौ देव आह्वान लाञ्छनं ॥ (variants: कुर्वे घन्टारवं तत्र देवताह्वानलाञ्छनम् / कुरु घण्टारवं तत्र देवतावाहन लाञ्छनम्) ॥

घण्टनादं कृत्वा। देव आह्वान लाञ्छनं

ज्ञानथोऽज्ञानतोवापि कांस्य घण्टान् नवादयेत्। राक्षसानां पिशाचानां तद्देशे वसतिर्भवेत्।

तस्मात् सर्व प्रयत्नेन घण्टानादं प्रकारयेत्।

घण्टदेवताभ्यो नमः। सकलओपचार पूजार्थे अक्षतान् समर्पयामि।

=========================== ========================================

## आत्मशुद्धि ॥

( Sprinkle water from sha~Nkha on puja items and devotees)

अपवित्रो पवित्रो वा सर्व अवस्थाङ्गतोपि वा। यः स्मरेत् पुण्डरीकाक्षं सः बाह्याभ्यन्तरः शुचिः ॥

देहो देवालयः प्रोक्तो जीवो सदाशिवः(variant देवसनातन)। त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ॥

ओं। आत्मने नमः। अन्तरात्मने नमः। जीवात्मने। परमात्मने नमः।

ज्ञानात्मने नमः। सत्यात्मने नमः ॥

=========================== ========================================

## प्रोक्षणः॥

Sprinkle water from KALASA PATHRAM on puja items and devotees)

अपवित्रो पवित्रो वा सर्व अवस्थाङ्गतोपि वा। यः स्मरेत् पुण्डरीकाक्षं सः बाह्याभ्यन्तरः शुचिः ॥ ॐ भूर्भुवःसुवः। ॐ भूर्भुवःसुवः। ॐ भूर्भुवःसुवः ॥ एवं शङ्ख/कलशजलेन पूजा सामाग्री आत्मानञ्च सम्प्रोक्ष्याः ॥

=========================== ========================================

## पीठ पूजा॥ **(Some manthras mandatory)** **(Touch the Peetam given to Bhaghavaan)**

ॐ सकलगुनात्मा शक्तियुक्ताय योग पीठात्मने नमः ॥

आधार शक्त्यै नमः ॥ मूलप्रकृते नमः ॥ वराहाय नमः ॥ (variant कूर्माय कूर्माय नमः)

अनन्ताय नमः ॥ पद्माय नमः ॥ नालाय नमः ॥

कन्दाय नमः ॥ कर्णिकाय नमः ॥ पत्रेभ्यो नमः ॥

दलेभ्यो नमः ॥ केसरेभ्यो नमः ॥ वास्त्वधिपतये ब्रह्मणे नमः।

वास्तुपुरुषाय नमः। श्वेत द्वीपाय नमः। स्वर्णमण्डपाय नमः।

अमृतार्णवाय नमः। रत्नद्वीपाय नमः। नवरत्नमयमण्डपाय नमः।

भद्रकमलासनायै नमः। गुणाधिपतये नमः। सरस्वत्यै नमः।

दुर्गायै नमः। क्षेत्रपालाय नमः। धर्माय नमः।

ज्ञानाय नमः। वैराग्याय नमः। ऐश्वर्याय नमः।

अधर्माय नमः। अज्ञानाय नमः। अवैराग्याय नमः।

अनैश्वर्याय नमः। अव्यक्तविग्रहाय नमः। अनन्दकन्दाय नमः।

आकाशबीजात्मने बुद्धिनालाय नमः। आकाशात्मने कर्णिकायै नमः।

वाय्वात्मने केसरेभ्यो नमः। अग्न्यात्मने दलेभ्यो नमः।

अं अर्कमण्डलाय वसुप्रदद्वादशकलातत्वात्मने नमः। दश दिक्पालेब्यो नमः

उं सोममण्डलाय वसुप्रदषोडशकलातत्वात्मने नमः।

मं वह्निमण्डलाय वसुप्रददशकलातत्वात्मने नमः।

सं सत्वाय नमः। रं रजसे नमः। तं तमसे नमः।

विं विद्यायै नमः। आं आत्मने नमः। उं परमात्मने नमः।

मं अन्तरात्मने नमः। ॐ ह्रीं ज्ञानत्मने नमः। पीठपूजां समर्पयामि ॥

**तन्मध्ये दुर्गा लक्ष्मी युक्तां सरस्वत्यै नमः।** स्वामिन् सर्व जगन्नाथ यावत् पूजावसानकम्। तावत्त्वं प्रीति भावेन लिङ्गेस्मिन् सन्निधो भव ॥

ॐ मधुवाता ऋतायथे मधुक्षरन्ति सिन्धवः माध्विनः सन्तोष्वधीः मधुनक्ता मुथोषसो मधुमत्वार्थिवं रजः मधुद्यौ रस्तुनः पिता मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवन्तुनः ॥

तन्मध्ये ॐ श्री बाल गुरुनाथाय नमः। (variants as appropriate: तन्मध्ये दुर्गा लक्ष्मी युक्तां सरस्वत्यै नमः | तन्मध्ये श्री भवानि शङ्कराय नमः। ) पीठ पूजां समर्पयामि ॥

गङ्गाच यमुनाश्चैव नर्मदाश्च सरस्वति। तापि पयोष्णि रेवच ताभ्यः स्नानार्थमाहृतम् ॥

=========================== =========================================

# PART 2: PRADHANA POOJA

## ALL IN ONE simple way

ॐ भूर्भुवस्वः *साङ्गं सपरिवारं सायुधं सशक्तिकं महा गणपतिं* आवाहयामि ।

(invoking Ganapathu with Siddhi, Buddhi, entire family, weapons and might)

*ॐ महागणपतये नमः | आवाहनं समर्पयामि |*

*ॐ महागणपतये नमः | आसनं समर्पयामि |*

*ॐ महागणपतये नमः |*पादारविन्दयोः पाद्यं *पाद्यं समर्पयामि |*

*ॐ महागणपतये नमः |*हस्तेषु अर्घ्यमर्घ्यं *समर्पयामि |*

*ॐ महागणपतये नमः |*मुखारविन्दे आचमनीयमाचमनीयं *समर्पयामि |*

*ॐ महागणपतये नमः |*मलापकर्षणस्नानं *स्नानं समर्पयामि |*

*ॐ महागणपतये नमः |*फलपञ्चामृतस्नानं समर्पयामि ।

ॐ महागणपतये नमः – स्नानाङ्गमाचमनीयमाचमनीयं समर्पयामि ।

*स्नानानन्तरं आचमनीयं समर्पयामि |*

*ॐ महागणपतये नमः | वस्त्रं समर्पयामि | ॐ महागणपतये नमः | यज्ञोपवीतं समर्पयामि |*

*ॐ महागणपतये नमः |*दिव्य *गन्धान् धारयामि |*` ॐ महागणपतये नमः | आभरणानि समर्पयामि

*ॐ महागणपतये नमः | परिमल द्रव्यं समर्पयामि |ॐ महागणपतये नमः | अक्षतान् समर्पयामि |*

*ॐ महागणपतये नमः | पुष्पैः पूजयामि |*

## महा गणपति पूर्वाङ्ग प्रार्थना।

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोऽपशान्तये॥

*(Manthraas in this colour is MANDATORY. Rest are optional)*

करिष्ये गणनाथास्य व्रतं संपत्करं शुभम्. भक्तानां अभीष्ट वरदं सर्व मङ्गल कारणम्

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुदेवो महेश्वरः। गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः॥

## महा गणपति ध्यानम् (Some manthras mandatory)

ॐ गणानां त्वा गणपतिं गं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिस्सीद सादनम्॥

अगजानन पद्मार्कं गजाननमहर्निशम्। अनेकदं तं भक्तानां एकदन्तमुपास्महे॥

**अस्मिन् हरिद्रा बिम्बे श्री विघ्नेस्वरम् ध्यायामि**

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षकं। भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥

पार्वतीनन्दनं शम्भोरानन्दपरिवर्धनम्। भक्तानन्दकरं नित्यं मयूरेशं नमाम्यहम्॥

मूषिकवाहन् मोदकहस्त चामरकर्ण विलम्बित सूत्र। वामनरूप महेश्वरपुत्र विघ्नविनायक पाद नमस्ते।।

आवाहये तं गणराजदेवं रक्तोत्पलाभासमशेषवन्द्यम्। विध्नान्तकं विध्नहरं गणेशं भजामि रौद्रं सहितं च सिद्धया॥

धूम्रकेतुर्गणाध्यक्षो फालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते॥

(Whoever chants or hears these 12 names of Lord Ganesha will not have any obstacles in all their endeavours)

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि। सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव। विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुग्मं स्मरामि॥

(what is the best time to worship lord? When our heart is at the feet of Lord Narayana, then the strengths of the stars, the moon, the knowledge and all Gods will combine and make it the most auspicious time / day to worship the Lord

सर्वदा सर्व कार्येषु नास्ति तेषां अमङ्गलम्।येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः॥

(When Lord Hari, who brings auspiciousness is situated in our hearts, then there will be no moreinauspiciousness in any of our undertakings)

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके। शरण्ये त्र्यम्बके देवी नारायणी नमोऽस्तुते॥

(We completely surrender ourselves to that Goddess who embodies auspiciousness, who is full of auspiciousness and who brings auspicousness to us)

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।येषां इन्दीवर श्यामो हृदयस्थो जनार्दनः॥

(When the Lord is situated in a person's heart, he will always have profit in his work and victory in all that he takes up and there is no question of defeat for such a person)

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान्। सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये॥

(To achieve success in our work and to find fulfillment we should first offer our prayers to Lord Vinayaka and then to our teacher, then to the Sun God and to the holy trinity of Brahma, ViShNu and Shiva)

आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम्।आहार्यं चन्द्र तारादि तं नुमः सात्विकं शिवम्॥

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि।विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा॥

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

त्वमेव माता च पिता त्वमेव। त्वमेव बन्धुश्च सखा त्वमेव।त्वमेव विद्या द्रविणं त्वमेव। त्वमेव सर्वं मम देव देव॥

ॐ प्रणो॑ दे॒वि सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती। धी॒नाम॑वि॒त्र्य॑वतु॥ॐ वाग्दे॒व्यै॒ नम॑ः॥

ॐ नमो॒ ब्रह्म॑णे धा॒रणं॑ मे अ॒स्त्वनि॑राकरणं धा॒रयि॑ता भूयासं॒ कर्ण॑योश्श्रु॒तं मा च्यो॑ढ्वं॒ ममा॒मुष्य॒ ओम्॥

अविघ्नमस्तु। सुमुहूर्तमस्तु। सुप्रतिष्ठितमस्तु। उत्तरे कर्मणि नैर्विघ्न्यमस्तु॥ शुभं शोभनमस्तु। इष्ट देवता कुलदेवता महा गणपति सुप्रसन्ना वरदा भवतु॥

**महा गनपति पूजा संकल्पं** **(Some manthras mandatory)** Sankalpa for all pUjas together

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोऽपशान्तये॥

प्राणायामः ॐ प्रणवस्य परब्रह्म ऋषिः। परमात्मा देवता। दैवी गायत्री छन्दः। प्राणायामे विनियोगः॥ ॐ भूः। ॐ भुवः। ॐ स्वः। ॐ महः। ॐ जनः। ॐ तपः। ॐ सत्यम्।ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही धियो यो नः प्रचोदयात्॥ ॐ ॐ ॐ भूर्भुवस्सुवरोम्॥

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य, सुभे, शोभने मुहूर्ते, अद्य ब्रह्मणोऽद्वितीय परार्धे, विष्णुपदे, श्री श्वेतवराह कल्पे, वैवस्वत मन्वन्तरे, अष्टा विंशति तमे, कलियुगे, प्रथमे पादे, (If in abroad) (अमुक देशे, अमुक सग्रामे) अमुक पार्श्वे,) (If in India) जम्बूद्वीपे, भारत वर्षे, भरत खण्डे मेरोः दक्षिनाः दण्डकारण्य देशे गोदावर्या दक्षिणे तीरे कवेर्योः उत्तरे तीरे परशुराम क्षत्रे शालिवाहन शके, अस्मिन् वर्तमाने, व्यवहारिके, चान्द्रमानेन प्रभावादि षष्टि सम्वस्तराणम् मद्ये , (अमुक) नाम संवत्सरे (अमुक अयणे (अमुक) ऋतौ (अमुक) मासे, (अमुक) पक्षे, (अमुक) शुभतिथौ,
(अमुक) नक्षर युक्तायां, (अमुक) वासर युक्तायां, सर्व ग्रहेषु, यथा राशि स्थान स्थितेषु, सत्सु, शुभ योग, शुभ करण, येवं गुणविशेषेण, विशिष्टायां, अस्यां शुभपुण्यतिथौ,
मम उपात्त समस्त दुरित क्षयद्वारा श्री परमेश्वर प्रीत्यर्थं, तदेव लग्मन सुदिनं तदेव तारा बलं चन्द्र बलं तदेव विद्याबलं दैव बलं तदेव लक्ष्मी पतेः अङ्घ्रियुगम् स्मारामि ॥

जन्माभ्यासत् जन्म प्रभृथि एतत् क्षण पर्यन्तं मद्ये संभावितनां सर्वेषां पापानां सध्यः अपनोदनार्थं,

मम सकुटुम्बस्य क्षेम, स्थैर्य, **वीर्य, विजय** आयुरारोग्य, **ऐश्वर्य, विध्या, श्रियंदेहबलं, उद्योगबलं** अभिवृद्ध्यर्थं आदौ **निर्विघ्नता** सिध्यर्थं श्री **महा** गणपति पूजां करिष्ये

( perform MahA Ganapathy pUja **)**

ॐ गणानां त्वा शौनको गृत्समदो गणपतिर्जगति गणपत्यावाहने विनियोगः

ॐ भूर्भुवस्वः **महागणपतये नमः | ध्यायामि | ध्यानं समर्पयामि**

(pour a drop of water with udddharani in a plate)

**महा गनपति** आवाहनम् **(Some manthras mandatory)** (AvAhanam invoking Mahaganapathy swami in Turmric cone)

सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतों वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्॥ *this colour is from PURUSHA SOOTHAM. OPTIONAL*

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥१॥ *this colour is from SHREE SOOTHAM. OPTIONAL*

अत्रागच्छ जगद्वन्द्य सुरराजार्चित इश्वर अनाथनाथ सर्वज्ञ गीर्वाणासुर पूजित

अस्मिन् हरिद्रा बिम्बे (वा or कलशे वा or कुम्बे वा or चित्र पटे वा or मृत्तिक बिम्बे (this is idol made of earth) साङ्ग सायुधं सपरिवारं सवाहनं सर्वशक्तियुतं **श्री महा गनपतिम् आवाहयामि**

भूः गणपतिं आवाहयामि। भुवः गणपतिं आवाहयामि। स्वः गणपतिं आवाहयामि।

ॐ गणानां त्वा शौनको गृत्समदो गणपतिर्जगति गणपत्यावाहने विनियोगः

(pour a drop of water with udddharani in a plate)

**|| महा गनपति प्राण प्रतिष्ठापनम्॥** **(Some manthras mandatory)** invoke life in to the turmeric ganesa whom we meditated upon and invited.

अस्य श्री महागणपति प्राण प्रतिष्ठापन मन्त्रस्य गणक ऋषिः

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळम् क्षं | ॐ हंसः सोऽहं सोऽहं हंसः | श्री महा गणपतेः प्राण इह प्राणः | जीव इह स्थितः| सर्वेन्द्रियाणि वाङ्ग् मनस्त्वक्चक्षुः श्रोत्र जिह्वा घ्राण प्राण अपान व्यान उदान समानाः इहैवागत्य सुखम् चिरं तिष्ठन्तु स्वाहा॥ सान्निध्यं कुर्वन्तु स्वाहा॥ अंसुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नों धेहि भोगम्। ज्योक् पंश्येम सूर्यमुच्चरंन्तमनुमते मृळया नः स्वस्ति॥ आं ह्रीं क्रों क्रों ह्रीं आं |आं ह्रीं क्रों क्रों ह्रीं आं |आं ह्रीं क्रों क्रों ह्रीं आं |आं ह्रीं क्रों क्रों ह्रीं आं|

| | | |
|---|---|---|
| निचृद्गायत्री छन्दः | श्री महा गणपतिर्देवता। | गलं बीजं। |
| गलीं शक्तिः । | ग्लौं कीलकं। | गां अंगुष्ठाभ्यायां नमः। |
| गीं तर्जनीभ्यां नमः। | गूं मध्यमाभ्यां नमः। | गैं अनामिकाभ्यां नमः। |
| गौं कनिष्ठिकाभ्यां नमः। | गः करतलकरपृष्ठाभ्यायां नमः। | गां हृदयाय नमः। |
| गीं शिरसे स्वाहा । | गूं शिखायै वौषट्। | गैं कवचाय हुम् । |
| गौं नेत्रत्रयाय वौषट्। | गः अस्त्राय फट् । | भूर्भुवस्सुवरोम् इति दिग्बन्धः |

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः सुप्रतिष्ठिताः  वरदाः भवत्।

ॐ श्री महा गणपति प्राणशक्त्यै नमः॥ आवाहितो भव| स्थापितो भव| सन्निहितो भव| सन्निरुद्धो भव| अवकुण्ठितो भव | सुप्रीतो भव | सुप्रसन्नो भव| सुमुखो भव| वरदो भव| प्रसीद प्रसीद|| देव सर्व जगन्नाथ  याव द्धोमावसानकं  तावत्व प्रीतिभावेन मूर्तौ अग्नौसन्निधिं कुरु  ||

लं पृथ्व्यात्मिकायै गन्धं समर्पयामि। हं आकाशात्मिकायै पुष्पं समर्पयामि। यं वाय्वात्मिकायै धूपमाघ्रापयामि। रं अग्न्यात्मिकायै दीपं दर्शयामि। वं अमृतात्मिकायै अमृत महानैवेद्यं निवेदयामि। सं सर्वात्मिकायै सर्वोपचारपूजां समर्पयामि॥ ॐ भूर्भुवस्सुवरोम्॥

प्रतिष्ठान्ते करोम्यत्र मण्डले दैवतैः सह॥ प्राणप्रतिष्ठा कृत्वा

--------------------- ---------------------------------------------------

**महा गनपति आसनम्** **(Some manthras mandatory)** Aasanam: offer aasanam through manthraas to the Bhaghavaan after invoking him

पु॒रु॑ष ए॒वेदग्ं सर्वम्᳚। यद्भू॒तं यच्च॒ भव्यम्᳚। उ॒तामृ॑त॒त्व स्येशा॑नः। य॒दन्ने॑नाति॒रोह॑ति॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।       यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥

अनेक रत्न खचितं मुक्तामणि विभूषितं रत्नसिंहासनं चारु महा गनपति प्रति गृह्यतां

ह्रीं रम्यं सुशोभनं दिव्यं सर्व सौख्यकरं शुभम्। आसनं च मया दतं गृहाण गणनायक॥१॥

ह्रीं श्री सिद्धि बुद्धि सहित महागणपतेय नमः **रत्न सिंहासनं समर्पयामि** ।

--------------------- ---------------------------------------------------

NOTE: When we invoke Maha Ganapathy in a turmeric bimbam or a clay idol (we can't pour any of the snaanam items on the bimbam. So just show the item to bimbam, then leave it in a brass plate. Only place a pushpam at the feet of the Maha Ganapathy idol saying pusphaihi poojayami.

--------------------- ---------------------------------------------------

**पाध्यम्** **(Some manthras mandatory)** PAdhyam (to washfeet of the Bhaghavaan after invoking him)

ए॒तावा॑नस्य महि॒मा। अतो॒ ज्याया॑ग्ं श्च॒ पूरु॑षः। पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑। त्रि॒पाद॑स्या॒मृत॑ं दि॒वि

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।  श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्

गौरी पुत्र नमस्तेस्तु दूर्वापद्माादि संयुतं । भक्त्या पाद्यं मया दत्तं गृहाण द्विरदानना॥

पापं पारय मे सर्वं पुत्रपौत्रान् प्रवर्द्धय॥

ह्रीं उष्णोदकं निर्मलं च सर्वसौगन्ध्य संयुतम्। पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम्॥१॥

**ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय।पादयोः पाध्यं समर्पयामि**

-------------------- --------------------------------------------------

## आर्घ्यम् (Some manthras mandatory)Argyam (to wash hand)

त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाऽऽभवात्पुनः। ततो विश्वङ्व्यक्रामत्। साशनानशने अभि।

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्

सिद्धार्थ यव दूर्वाभि र्ग न्ध पुश्पाक्षतैर्युतं। तिल पुष्पं समायुक्तम्, गृहाणार्घ्यं गजानान॥

ह्रीं लब्धपात्रे स्थितं तोयं गन्धपुष्पफ़लान्वितम्। सहिरण्यं मया दतं गृहाण गणनायक॥

**ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः अर्घ्यम् समर्पयामि ।**

-------------------- --------------------------------------------------

## आचमनम् (Some manthras mandatory) Aachmanam

तस्माँद्विराडंजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथों पुरः।

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्। तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे॥

कर्पूरगरु पुषपैश्च वासितम् विमलं जलं। भक्त्या दत्तं मयादेव कुरुष्व आचमनम् प्रभो॥

ह्रीं सर्वतीर्थं समायुक्तं सुगन्धि निर्मलं जलम्। आचम्यार्थं मया दतं गृहाण गणनायक॥

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः आचमनीयं सम।

गृहाणाचमनं देव गुणास्वामिन् गुणालय। गुरोरवि गुरो देव गुरुमे कुशलं विभो॥ एला कुंकुम कस्तूरी कर्पूरादि सुवासितैः। तीर्थैहि आचम्यताम् देव गङ्गाधर सुताव्याय॥

**ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः आचमनीयं समर्पयामि॥**

-------------------- --------------------------------------------------

## पयःस्नानं **(Some manthras mandatory)** (SnAnam with plain water)

यत्पुरुंषेण हुविषाँ। देवा युज्ञमतंन्वत। वसन्तो अंस्यासीदाज्यम्ँ। ग्रीष्म इ॒ध्मः श॒रद्धविः।६

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसानुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥

ह्रीं गङ्गा भागीरति गौतमि च यमुना वै सरस्वती रेवा पयोष्णी नर्मदादि पुण्य जलैः गन्ध पुष्पाक्षतैः युतैः।। दासां सलिल मानीय करोमिह्यभिक्षेचनं। *(Snaanam using ganaga etc rivers water)*

स्नापितोऽसि मया देव ह्रतः शान्तिं प्रयछ मे ॥ भगवन् उमापुत्र नमोस्तु ते।

**ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः स्नानम् समर्पयामि ।**

-------------------- ---------------------------------------------------

## घृतम् / आज्यम् स्नानं *(ghee)*

ह्रीं नवनीत समुतपन्नं सर्वसंतोषकारकम् । घृत तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥१॥

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः घृतस्नानम् समर्पयामि पुनः शुद्धोदकस्नानं समर्पयामि । आचमनीयं सम॰।

-------------------- ---------------------------------------------------

## मधु स्नानं *(honey)*

ह्रीं तरुपुष्पं समुद्भूतम सुस्वादु मधुरं मधु । तेजपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥१॥

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः मधुस्नानम् समर्पयामि । पुनः शुद्धोदकस्नानं समर्पयामि । आचमनीयं समर्पयामि ।।

-------------------- ---------------------------------------------------

## मधुपर्क स्नानं *(snaanam using Honey + milk)*

दध्याज्य मधु संयुक्तं मधु पर्कं मयाहृतं गृहाण सर्वलोकेश गजवक्त्रा नमोस्तुते

सिद्धिबुद्धिसहितमहागणपतेय नमः मधुपर्कं समर्पयामि

कीरवाणानी किनी नाद प्रणतार्त्ति प्रपन्जन। मधुपर्कं गृहाणे दं पाहिमाम् करुणनिदे।

मधुपर्कं गृहाणेमां मधुसूदन वन्दित। महादेवसुतानन्त महापातक नाशनं॥

ह्रीं कामधेनु समुद्भूतं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥१॥

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः पुनः सुध्धोदक स्नानं समर्पयामि। *(Sudhdha udakam is mere clean after honey, ghee, cur, sandal, kumkum, pancha amrutam or whatever, a CLEAN up with normal water is required.*

-------------------- ---------------------------------------------------

## मलापकर्षणस्नानं *(washing off dirt मल mala + अपकर्षण aapakarshana)*

उद्वर्तनं मया दतं स्नानार्थं प्रतिगृह्यताम् ॥१॥

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः उद्वर्तनस्नानम् समर्पयामि । शुद्धोदकस्नानं समर्पयामि । आचमनीयं समर्पयामि ।।

-------------------- ---------------------------------------------------

## दधि स्नानं *(Curd)*

ह्रीं पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।दध्यानीतं मयादेव स्नानार्थं प्रतिगृह्यताम् . ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः दधिस्नानं समर्पयामि॥ पुनः शुद्धोदकस्नानं समर्पयामि॥

आचमनीयं सम।

-------------------- ---------------------------------------------------

## क्षीर स्नानं

सिद्धिबुद्धिसहितमहागणपतेय नमः क्षीरस्नानं समर्पयामि॥ पुनः शुद्धोदकस्नानं समर्पयामि॥ (milk)

आचमनीयं सम।

-------------------- ---------------------------------------------------

## शर्करा स्नानं

ह्रीं इक्षुसार समुद्भूता शर्करापुष्टिकारिका । मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः शर्करास्नानम् समर्पयामि । पुनः शुद्धोदकस्नानं समर्पयामि । आचमनीयं समर्पयामि ।।

-------------------- ---------------------------------------------------

## नारिकेळ उदक स्नानं *(tender coconut water)*

श्री सिद्धिबुद्धिसहितमहागणपतेय नमः नारिकेळ फलोदकस्नानं स्नानम् समर्पयामि । ॥ (coconut water) आचमनीयं समर्पयामि ।।

-------------------- --------------------------------------------------

## फलपञ्चामृतम् स्नानं *(pancha amrutam)*

शर्करा मधु आज्य दधि गोक्षीर फलसार घृतैर्युतं। पञ्चामृतम् स्नानमिदम् बहुलेय गृहाण मे *(sugar/ jiggery +honey+ghee+curd+ cow milk+ fruit juices)*

पञ्चामृतेन परम पञ्चपातक नाशन। स्नानं कुरु सदाराद्ध्य गणनायक ॥ *(by doing panchaamrutha abisEkam, all 5 types of sins getdestroyed)*

श्री सिद्धिबुद्धिसहितमहागणपतेय नमः फलपञ्चामृत स्नानम् समर्पयामि । *(panchamrutha abishekam)*

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः पुनःसुध्धोदक स्नानं समर्पयामि। *(Sudhaudakam is mere clean after pancgamrutha, gendam and suh* स्नानन्थरं आचमनीयं समर्पयामि।

-------------------- --------------------------------------------------

## गन्धोदकस्नानं *(sandal /chandanam mixed with water)*

ह्रीं मलयाचल संभूतं चन्दनागरुकेशरम् । चन्दनं च मया दत्तं स्नानार्थं प्रतिगृह्यताम् ।

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः गन्धोदकस्नानं समर्पयामि॥ पुनः शुद्धोदकस्नानं समर्पयामि॥ स्नानन्थरं आचमनीयं समर्पयामि।

-------------------- --------------------------------------------------

## पुष्पोदकस्नानं *(flower dipped water)*

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः पुष्पोदकस्नानं समर्पयामि॥ पुनः शुद्धोदकस्नानं समर्पयामि॥ स्नानन्थरं आचमनीयं समर्पयामि।

-------------------- --------------------------------------------------

## अक्षतोदकस्नानं *(akshatha i.e rice dipped water)*

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः अक्षतोदकस्नानं समर्पयामि॥ पुनः शुद्धोदकस्नानं समर्पयामि॥ स्नानन्थरं आचमनीयं समर्पयामि।

-------------------- --------------------------------------------------

## सुवर्णोदकस्नानं *(gold ornaments dipped wateror put gold and then perform abishekam)*

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः सुवर्णोदकस्नानं समर्पयामि॥ पुनः शुद्धोदकस्नानं समर्पयामि॥ स्नानन्थरं आचमनीयं समर्पयामि।

-------------------- --------------------------------------------------

## रुद्राक्षोदकस्नानं *(rudhraaksham dipped water)*

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः रुद्राक्षोदकस्नानं समर्पयामि॥ पुनः शुद्धोदकस्नानं समर्पयामि॥ स्नानन्थरं आचमनीयं समर्पयामि।

-------------------- --------------------------------------------------

## बिल्वोदकस्नानं *(bilvam leaves dipped water)*

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः बिल्वोदकस्नानं समर्पयामि॥ शुद्धोदकस्नानं समर्पयामि॥ स्नानन्थरं आचमनीयं समर्पयामि।

-------------------- --------------------------------------------------

## दूर्वोदकस्नानं *(durvayugmam is a sacred grass offered to Ganesa దూర్వ அறுகம்புல் ) leaves dipped water)*

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः दूर्वोदकस्नानं समर्पयामि॥ पुनः शुद्धोदकस्नानं समर्पयामि॥ स्नानन्थरं आचमनीयं समर्पयामि।

-------------------- --------------------------------------------------

## भस्मस्नानं *(vibhuthi abishekam) (vibhoothi as it is – or with water)*

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः भस्मस्नानं समर्पयामि॥ पुनः शुद्धोदकस्नानं समर्पयामि॥ स्नानन्थरं आचमनीयं समर्पयामि।

-------------------- --------------------------------------------------

**न्यूनतां सम्पूर्णम्** (even if we have not done correctly or misse out some steps, all such deieicnies to be set right to conclude all abhisEka poojas)

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः पूर्व पूजार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि । नमस्करोमि। (to conclude all abhisEka poojas)

-------------------- --------------------------------------------------

**प्रोक्षणं** **(Some manthras mandatory)** *(After all snanam are over, take a few drops of abishEka theertham and put a few drops on your head and others in pooja)*

गङ्गा च यमुना तोयं मया स्नानार्थंमर्पितम्॥ ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः शुद्धोदकस्नानं समर्पयामि ।

**अनेन पन्चामृतादि स्नानाङ्ग्भूत पूजनेन आवाहित देवताः प्रियन्ताम् न मम ।**

-------------------- --------------------------------------------------

**वस्त्रयुग्मं** (Vastra yugmam (offering a cotton thread with interspersed flowers made of samecotton is vatrayugman)

स॒प्तास्यांसन्परि॒धयः। त्रिः स॒प्त स॒मिधः कृ॒ताः।दे॒वा यद्य॒ज्ञं तंन्वा॒नाः। अबंध्न॒न्पुंरुषं प॒शुम्।

उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥

वस्त्रयुग्मं च सिद्धिबुद्धिश वारिताखिल पातक। सुवर्णतन्तुभिः स्यूतं गृह्यतां गुह गणपते॥

दुकूल वस्त्र युगलं मुक्ताजाल समन्वितम्। प्रतिगृहाण गणपते मक्तापद्धंजनक्ष्म।

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः । वस्त्रयुग्मं समर्पयामि । पुष्पैः पूजयामि ।

-------------------- --------------------------------------------------

**वस्त्रम्** **(Some manthras mandatory)**

रक्त वस्त्र द्वयं देव राजराजादि पूजित। भक्त्या दत्तं गृहाणेदं भगवन् हरनन्दन।

- ह्रीं सर्वभूषाधिके सौम्ये लोकलज्जा निवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम्॥

ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः वस्त्रम् समर्पयामि ।पुष्पैः पूजयामि ।

**ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः वस्त्रान्ते-उपवस्त्रान्ते आचमनीय जलं समर्पयामि । पुष्पैः पूजयामि ।**

------------------- --------------------------------------------------

## उपवीतं **(Some manthras mandatory)**UpaVetham (offering sacred thread)

तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॑न्। पुरु॑षं जा॒तम॑ग्र॒तः।तेन॑ दे॒वा अय॑जन्त। सा॒ध्या ऋष॑यश्च॒ ये।

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥

ह्रीं नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ।

राजतं ब्रह्मसूत्रं च काञ्चनञ्चोत्तरीयकं। गृहाण  चारु सर्वयज्ञ भक्तानां इष्ट दायक ॥ यज्ञ्योपवीतं देवेश गृहाण गणनायक ॥ **ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः । उपवीतं समर्पयामि । यज्ञोपवीतान्ते आचमनियं समर्पयामि । पुष्पैः पूजयामि ।**

-------------------- --------------------------------------------------

## गन्धं **(Some manthras mandatory)**Gendam (offering gendham)

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑ः। सम्भृ॑तं पृषदा॒ज्यम्।प॒शूꣳस्ताꣳश्च॑क्रे वाय॒व्यान्। आ॒र॒ण्यान्ग्रा॒म्याश्च॒ ये।

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरींग् सर्वभूतानां तामिहोपह्वये श्रियम्॥

ह्रीं श्रीखंण्डं चन्दनं दिव्यं गंधाढयं सुमनोहरम् । चन्दनागरु कर्पूर कस्तूरी  कुम्कुमान्वितं ।

कस्तूरी कुङ्कुमोपेतं घनसार समन्वितं। गृहाण रुचिरं गन्ध मन्धकारि तनूभव॥ कस्तूरी कुंकुमाध्यैश्च वासितं सहिमोदकम्। विलेपनम् सुरश्रेश्ट प्रीत्यर्थं चन्दनं प्रतिगृह्यतां।

**ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः । गन्धान् धारयामि॥ गन्धान्ते आचमनियं समर्पयामि । पुष्पैः पूजयामि ।**

-------------------- --------------------------------------------------

## हरिद्रा **(Some manthras mandatory)**Haridra (offering turmeric pasuppu)

तस्मा॒दश्वा॑ अजायन्त। ये के चो॑भ॒याद॑तः। गावो॑ ह जज्ञिरे॒ तस्मा॑त्। तस्मा॑ज्जा॒ता अ॑जा॒वय॑ः।

कर्दमेन प्रजाभूता मयि सम्भव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥

**ह्रीं श्री सिद्धिबुद्धिसहितमहागणपतेय नमः । हरिद्राम् समर्पयामि ।हरिद्रान्ते आचमनियं समर्पयामि । पुष्पैः पूजयामि ।**

-------------------- --------------------------------------------------

## कुंकुमम् **(Some manthras mandatory)** (offering kumkuma)

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॑। ऋचः॒ सामा॑नि जज्ञिरे। छन्दा॑ग्ं॑सि जज्ञिरे॒ तस्मा॑त्। यजु॒स्तस्मा॑दजायत।

| ॐ त्रिगुणात्मने नमः । | ॐ पञ्चप्रणवभाविताय नमः । | ॐ सप्तांगराज्यसुखदाय नमः । |
| ॐ त्रिलोकादये नमः । | ॐ पञ्चब्रह्ममयस्फूर्तये नमः । | ॐ सप्तर्षिगणमण्डिताय नमः । |
| ॐ त्रिशक्तिशाय नमः । | ॐ पञ्चावरणवारिताय नमः । | ॐ सप्तछन्दोनिधये नमः । |
| ॐ त्रिलोचनाय नमः । | ॐ पञ्चभक्ष्यप्रियाय नमः । | ॐ सप्तहोत्रे नमः । 890 |
| ॐ चतुर्बाहवे नमः । | ॐ पञ्चबाणाय नमः । | ॐ सप्तस्वराश्रयाय नमः । |
| ॐ चतुर्दन्ताय नमः । | ॐ पञ्चशिवात्मकाय नमः । | ॐ सप्ताब्धिकेलिकासाराय नमः । |
| ॐ चतुरात्मने नमः । | ॐ षट्कोणपीठाय नमः ।870 | ॐ सप्तमातृनिषेविताय नमः । |
| ॐ चतुर्मुखाय नमः । | ॐ षट्चक्रधाम्ने नमः । | ॐ सप्तछन्दो मोदमदाय नमः । |
| ॐ चतुर्विधोपायमयाय नमः 850 | ॐ षड्ग्रन्थिभेदकाय नमः । | ॐ सप्तछन्दोमखप्रभवे नमः । |
| ॐ चतुर्वर्णाश्रमाश्रयाय नमः । | ॐ षडध्वध्वान्तविध्वंसिने नमः | ॐ अष्टमूर्तिध्येयमूर्तये नमः । |
| ॐ चतुर्विध वचोवृत्ति परिवृत्ति प्रवर्तकाय नमः 852 | ॐ षडङ्गुलमहाह्रदाय नमः | ॐ अष्टप्रकृतिकारणाय नमः । |
| | ॐ षण्मुखाय नमः । 875 | ॐ अष्टाङ्गयोगफलभुवे नमः ।898 |

| | | |
|---|---|---|
| ॐ अष्टपत्राम्बुजासनाय नमः । | ॐ दशाध्यायाय नमः । | ॐ सप्तदशाक्षराय नमः । 944 |
| ॐ अष्टशक्तिसमृद्धश्रिये नमः 900 | ॐ दशप्राणाय नमः । | ॐ अष्टादशद्वीप पतये नमः |
| ॐ अष्टैश्वर्यप्रदायकाय नमः । | ॐ दशेन्द्रियनियामकाय नमः । | ॐ अष्टादशपुराणकृते नमः । |
| ॐ अष्टपीठोपपीठश्रिये नमः । | ॐ दशाक्षरमहामन्त्राय नमः । | ॐ अष्टादशौषधीसृष्टये नमः । |
| ॐ अष्टमातृसमावृताय नमः । | ॐ दशाशाव्यापिविग्रहाय नमः । | ॐ अष्टादशविधिस्मृताय नमः । |
| ॐ अष्टभैरवसेव्याय नमः । | ॐ एकादशादिभीरुद्रैः स्तुताय नमः | ॐ अष्टादश लिपिव्यष्टि समष्टि ज्ञान कोविदाय नमः । |
| ॐ अष्टवसुवन्द्याय नमः । | ॐ एकादशाक्षराय नमः । | |
| ॐ अष्टमूर्तिभृते नमः । | ॐ द्वादशोद्दण्डदोर्दण्डाय नमः । | ॐ एकविंशाय पुंसे नमः ।950 |
| ॐ अष्टचक्रस्फूरन्मूर्तये नमः । | ॐ द्वादशान्तनिकेतनाय नमः 930 | ॐ एकविंशत्यङ्गुलिपल्लवाय नमः |
| ॐ अष्टद्रव्यहविः प्रियाय नमः । | ॐ त्रयोदशाभिदाभिन्न विश्वेदेवाधि दैवताय नमः । | ॐ चतुर्विंशतितत्वात्मने नमः । |
| ॐ नवनागासनाध्यासिने नमः । | | ॐ पञ्चविंशाख्यपुरुषाय नमः । |
| ॐ नवनिध्यनुशासिताय नमः 910 | ॐ चतुर्दशेन्द्रवरदाय नमः । | ॐ सप्तविंशतितारेशाय नमः । |
| ॐ नवद्वारपुराधाराय नमः । | ॐ चतुर्दशमनुप्रभवे नमः । | ॐ सप्तविंशति योगकृते नमः । |
| ॐ नवाधारनिकेतनाय नमः । | ॐ चतुर्दशादिविद्याढ्याय नमः । | ॐ द्वात्रिंशद्भैरवाधीशाय नमः । |
| ॐ नवनारायणस्तुत्याय नमः । | ॐ चतुर्दशजगत्प्रभवे नमः । | ॐ चतुस्त्रिंशन्महाह्रदाय नमः । |
| ॐ नवदुर्गा निषेविताय नमः । | ॐ सामपञ्चदशाय नमः । | ॐ षट् त्रिंशत्तत्त्वसंभूतये नमः । |
| ॐ नवनाथमहानाथाय नमः । | ॐ पञ्चदशीशीतांशुनिर्मलाय नमः | ॐ अष्टात्रिंशकलातनवे नमः । |
| ॐ नवनागविभूषणाय नमः । | ॐ षोडशाधारनिलयाय नमः । | ॐ नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गलाय नमः ।960 |
| ॐ नवरत्नविचित्राङ्गाय नमः । | ॐ षोडशस्वरमातृकाय नमः । | |
| ॐ नवशक्तिशिरोधृताय नमः । | ॐ षोडशान्त पदावासाय नमः 940 | ॐ पञ्चाशदक्षरश्रेण्यै नमः । |
| ॐ दशात्मकाय नमः । | ॐ षोडशेन्दुकलात्मकाय नमः । | ॐ पञ्चाशद् रुद्रविग्रहाय नमः । |
| ॐ दशभुजाय नमः । 920 | ॐ कलायैसप्तदश्यै नमः । | ॐ पञ्चाशद् विष्णुशक्तीशाय नमः । |
| ॐ दशदिक्पतिवन्दिताय नमः । | ॐ सप्तदशाय नमः । | ॐ पञ्चाशन्मातृकालयाय नमः 964 |

| | |
|---|---|
| ॐ द्विपञ्चाशद्वपुःश्रेण्यै नमः । | ॐ सहस्रपदे नमः । |
| ॐ त्रिषष्ट्यक्षरसंश्रयाय नमः । | ॐ सहस्रनाम संस्तुत्याय नमः । |
| ॐ चतुषष्ट्यर्णनिर्णेत्रे नमः | ॐ सहस्राक्षबलापहाय नमः । 985 |
| ॐ चतुःषष्टिकलानिधये नमः । | ॐ दशसहस्र फण भृत्फणि राज कृतासनाय नमः । |
| ॐ चतुःषष्टिमहासिद्धयोगिनी वृन्दवन्दिताय नमः | ॐ अष्टाशीतिसहस्राद्यमहर्षि स्तोत्रयन्त्रिताय नमः । |
| ॐ अष्टषष्टि महातीर्थ क्षेत्र भैरव भावनाय नमः 970 | ॐ लक्षाधीशप्रियाधाराय नमः । |
| ॐ चतुर्नवति मन्त्रात्मने नमः । | ॐ लक्ष्याधारमनोमयाय नमः । |
| ॐ षण्णवत्यधिकप्रभवे नमः । | ॐ चतुर्लक्षजपप्रीताय नमः । |
| ॐ शतानन्दाय नमः । | ॐ चतुर्लक्षप्रकाशिताय नमः । |
| ॐ शतधृतये नमः । | ॐ चतुरशीतिलक्षाणां जीवानां देहसंस्थिताय नमः । |
| ॐ शतपत्रायतेक्षणाय नमः । 975 | ॐ कोटिसूर्यप्रतीकाशाय नमः । |
| ॐ शतानीकाय नमः । | ॐ कोटिचन्द्रांशुनिर्मलाय नमः । |
| ॐ शतमखाय नमः । | ॐ शिवाभवाध्युष्टकोटिविनायकधुरन्धराय नमः । |
| ॐ शतधारावरायुधाय नमः । | ॐ सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतये नमः । |
| ॐ सहस्रपत्रनिलयाय नमः । | ॐ त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकाय नमः । |
| ॐ सहस्रफणभूषणाय नमः ।980 | ॐ अनन्तनाम्ने नमः । |
| ॐ सहस्रशीर्ष्णे पुरुषाय नमः । | ॐ अनन्तश्रिये नमः । |
| ॐ सहस्राक्षाय नमः । | ॐ अनन्तानन्तसौख्यदाय नमः1000 |

श्रीगणपतिसहस्रनामावलिः संपूर्णम्।

## PART 3: UTHTHARA POOJAS:

## ALL IN ONE simple UTHTHRA POOJA (if short of time,)

ॐ महागणपतये नमः | धूपं आघ्रापयामि | ॐ महागणपतये नमः | दीपं दर्शयामि |

ॐ महागणपतये नमः – धूपदीपानन्तरं आचमनीयमाचमनीयं समर्पयामि

ॐ भूर्भुव॒स्सुवः॑ तत्सवि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि धियो॒ यो नः॑ प्रचो॒दया॑त् ॥ देव सवितः प्रसुव । स॒त्यं त्व॒र्तेन॒ परि॑षिञ्चा॒मि ॥ अ॒मृतो॒प॒स्तर॑णमसि ॥ ॐ प्रा॒णाय॒ स्वाहा॑ । ॐ अ॒पा॒नाय॒ स्वाहा॑ । ॐ व्या॒नाय॒ स्वाहा॑ । ॐ उ॒दा॒नाय॒ स्वाहा॑ । ॐ स॒मा॒नाय॒ स्वाहा॑ । ॐ ब्रह्म॑णे स्वा॒हा ॥

शाल्यन्नं पायसं क्षीरं लड्डुकान् मोदकानपि फलानि च। निवेद्यं संगृहानेश नित्य तृप्त नमोस्तुते

ॐ महागणपतये नमः| महा नैवेद्यं निवेदयामि श्रीमहागणपतये नमः दिव्यमङ्गलनीराजनं दर्शयामि ।

ॐ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमो नमः ॥

ॐ महागणपतये नमः | ताम्बूलं समर्पयामि | ॐ महागणपतये नमः | फलं समर्पयामि |

ॐ महागणपतये नमः | दक्षिणां समर्पयामि | ॐ महागणपतये नमः | आर्तिक्यं समर्पयामि |

ॐ भूर्भुवस्वः महागणपतये नमः | मन्त्रपुष्पं समर्पयामि | ॐ भूर्भुवस्वः महागणपतये नमः | स्वर्नपुष्पं समर्पयामि |

यानि कानि च पापानि जन्मान्तर कृतानि च ।तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

प्रदक्षिण त्रियं देव प्रयत्नेन मया कृतम् । तेन पापाणि सर्वाणि विनाशाय नमोऽस्तुते ॥

ॐ महागणपतये नमः | प्रदक्षिणा नमस्कारान् समर्पयामि |

ॐ महागणपतये नमः | प्रसन्नार्घ्यं समर्पयामि |ॐ भूर्भुवस्वः महागणपतये नमः | छत्रं समर्पयामि |

ॐ महागणपतये नमः | चामरं समर्पयामि | ॐ महागणपतये नमः | गीतं समर्पयामि |

ॐ महागणपतये नमः | नृत्यं समर्पयामि | ॐ महागणपतये नमः | वाद्यं समर्पयामि |

ॐ महागणपतये नमः | दर्पणं समर्पयामि | ॐ महागणपतये नमः | व्यञ्जनं समर्पयामि |

ॐ महागणपतये नमः | आन्दोलणं समर्पयामि |ॐ महागणपतये नमः | सर्व राजोपचारान्

समर्पयामि ||

--------------------- ----------------------------------------------------

On Vinaayaka chathurthi day, usually Ganapthy Atharva Szeersham is chanted

This is however optional.

## महा गनपति अथर्वशीर्षम् जप || Powerful . To chant if time availabe

ॐ भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः । स्थि॒रैरङ्गै॑स्तुष्टु॒वाग्ं स॑स्त॒नूभि॑ः । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ । स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः । स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥ ॐ शान्ति॒ः शान्ति॒ः शान्तिः॑ ॥

ॐ नम॑स्ते ग॒णप॑तये । त्वमे॒व प्र॒त्यक्षं॒ तत्त्व॑मसि । त्वमे॒व के॒वलं॒ कर्ता॑ऽसि । त्वमे॒व के॒वलं॒ धर्ता॑ऽसि । त्वमे॒व के॒वलं॒ हर्ता॑ऽसि । त्वमेव सर्वं॑ खल्विदं॑ ब्रह्मा॒सि । त्वं साक्षादात्मा॑ऽसि नि॒त्यम् ॥ १ ॥

ऋ॑तं व॒च्मि । स॑त्यं व॒च्मि ॥ २ ॥

अव॒ त्वं॒ माम् । अव॑ व॒क्तारम्॰ अव॑ श्रो॒तारम्॰ अव॑ दा॒तारम्॰ अव॑ धा॒तारम्॰ अवानूचानम॑व शि॒ष्यम् । अव॑ प॒श्चात्तात्॰। अव॑ पु॒रस्तात्॰। अवोत्त॒रात्तात्॰। अव॑ दक्षि॒णात्तात्॰। अव॑ चो॒र्ध्वात्तात्॰। अवाध॒रात्तात्॰। सर्वतो मां पाहि पाहि॑ सम॒न्तात् ॥ ३ ॥

त्वं वाङ्मय॑स्त्वं चिन्म॒यः । त्वमानन्दमय॑स्त्वं ब्रह्म॒मयः । त्वं सच्चिदानन्दाऽद्वि॑तीयो॒ऽसि । त्वं प्र॒त्यक्षं॒ ब्रह्मा॑सि । त्वं ज्ञानमयो विज्ञान॑मयो॒ऽसि ॥ ४ ॥

सर्वं॑ जगदिदं त्व॑त्तो जा॒यते । सर्वं॑ जगदिदं त्व॑त्तस्ति॒ष्ठति । सर्वं॑ जगदिदं त्वयि लय॑मेष्य॒ति । सर्वं॑ जगदिदं त्वयि॑ प्रत्ये॒ति । त्वं भूमिरापोऽनलोऽनि॑लो न॒भः । त्वं चत्वारि वा॒क्पदा॒नि ॥ ५॥

त्वं गु॒णत्र॑याती॒तः । त्वं अवस्थात्र॑याती॒तः । त्वं दे॒हत्र॑याती॒तः । त्वं का॒लत्र॑याती॒तः । त्वं मूलाधार स्थितो॑ऽसि नि॒त्यम् । त्वं शक्तित्र॑यात्म॒कः । त्वां योगिनो ध्याय॑न्ति नि॒त्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म॒ भूर्भुव॒ः स्वरोम् ॥ ६ ॥

ग॒णादिं॑ पूर्व॑मुच्चा॒र्य॒ व॒र्णादीं॑ स्तदन॒न्तरम् । अनुस्वारः प॑रत॒रः । अर्धे॑न्दुल॒सितम् । तारे॑ण ऋ॒द्धम् । एतत्तव मनु॑स्वरू॒पम् । गकारः पू॑र्वरू॒पम् । अकारो मध्य॑मरू॒पम् । अनुस्वारश्चा॑न्त्यरू॒पम् ।

बिन्दुरुत्त॑ररू॒पम् । नाद॑ः सन्धा॒नम् । सग्ं॑हि॒ता स॒न्धिः । सैषा गणे॑शवि॒द्या । गण॑क ऋ॒षिः । निचृद्गाय॑त्रीच्छ॒न्दः। गणपति॑र्दे॒वता । ॐ गं ग॒णप॑तये नमः ॥ ७ ॥

एकद॒न्ताय॑ वि॒द्महे॑ वक्रतु॒ण्डाय॑ धीमहि । तन्नो॑ दन्तिः प्रचो॒दया॑त् ॥ ८॥ ॥

एकद॒न्तं च॑तुर्ह॒स्तं॒ पा॒शम॑ङ्कुश॒धारि॑णम् । रदं॑ च॒ वर॑दं ह॒स्तै॒र्बि॒भ्राणं॑ मूष॒कध्व॑जम् । रक्तं॑ ल॒म्बोद॑रं शू॒र्प॒क॒र्णकं॑ रक्त॒वास॑सम् । रक्त॑ग॒न्धानु॑लिप्ता॒ङ्गं॒ र॒क्तपु॑ष्पैः सु॒पूजि॑तम् । भक्ता॑नु॒कम्पि॑नं दे॒वं॒ ज॒गत्का॑रण॒मच्यु॑तम् । आवि॑र्भू॒तं च॑ सृ॒ष्ट्या॒दौ॒ प्र॒कृते॑ः पुरु॒षात्प॑रम् । एवं॑ ध्या॒यति॑ यो नि॒त्यं॒ स॒ योगी॑ योगि॒नां व॑रः॥ ९॥

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्तये॒ नम॑ः ॥ १० ॥

एतदथर्वशीर्षं॑ योऽधी॒ते स ब्रह्मभूया॑य क॒ल्पते । स सर्वविघ्नै॑र्न बा॒ध्यते । स सर्वत्र सुख॑मेध॒ते । स पञ्चमहापापा॑त् प्रमु॒च्यते । सा॒यम॑धीया॒नो॒ दिवसकृतं पाप॑ं नाश॒यति । प्रा॒तर॑धीया॒नो॒ रात्रि॑कृतं पाप॑ं नाश॒यति । सायं प्रातः प्र॑युञ्जा॒नो॒ पापोऽपा॑पो भ॒वति । सर्वत्राधीयानोऽपवि॑घ्नो भ॒वति । धर्मार्थकाममोक्षं॑ च वि॒न्दति । इदमथर्वशीर्षमशिष्याय॑ न दे॒यम् । यो यदि मो॑हाद् दा॒स्यति स पापी॑यान् भ॒वति । सहस्रावर्तनाद्यं यं काम॑मधी॒ते तं तमने॑न सा॒धयेत् ॥ ११ ॥

अनेन गणपतिम॑भिषि॒ञ्चति स वा॑ग्मी भ॒वति । चतुर्थ्यामन॑श्नन् ज॒पति स विद्या॑वान् भ॒वति । इत्यथर्व॑णवा॒क्यम् । ब्रह्माद्या॒वर॑णं वि॒द्यान्न बिभेति कदा॑चने॒ति ॥ १२ ॥

यो दू॒र्वाङ्कु॑रैर्य॒जति स वैश्रवणोप॑मो भ॒वति । यो ला॑जैर्य॒जति स यशो॑वान् भ॒वति । स मेधा॑वान् भ॒वति । यो मोदकसहस्रे॑ण य॒जति स वाञ्छितफलम॑वाप्नो॒ति । यः साज्य समि॑द्भिर्य॒जति स सर्वं लभते स स॑र्वं ल॒भते ॥ १३ ॥

अष्टौ ब्राह्मणान् सम्यग् ग्रा॑हयि॒त्वा सूर्यवर्च॑स्वी भ॒वति । सूर्यग्रहे म॑हान॒द्यां प्रतिमासन्निधौ वा ज॒प्त्वा सिद्धम॑न्त्रो भ॒वति । महाविघ्ना॑त् प्रमु॒च्यते । महादोषा॑त् प्रमु॒च्यते । महाप्रत्यवाया॑त् प्रमु॒च्यते । स सर्वविद्भवति स सर्व॑विद्भ॒वति । य ए॑वं वे॒द । इत्यु॑प॒निष॑त् ॥ १४ ॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

## धूपम् **(Some manthras manadatory)** DhUpam *(Incense sticks or sambrani in charcoal pieces)*

*Usually*

यत्पुरुषं व्यंदधुः । कतिधा व्यंकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादांवुच्येते।

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे । नि च देवीं मातरं श्रियं वासय मे कुले ॥

ॐ धूरंसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान् धूर्वतितं धूर्वयं वयं धूर्वामस्त्वं

देवानांमसि। सस्निंतमं पप्रिंतमं जुष्टंतमं वह्निंतमं देवहूतंममहृंतमसि हविर्धानं

दृ गंऽहस्व माह्वांर्मित्रस्यं त्वा चक्षुंषा प्रेक्षे माभेर्मा संविक्था मा त्वां हिऽसिषम् ॥

दशाङ्गं गुग्गुलूपेतं सुगन्धं च मनोहरं ।

**चान्दनागरुकस्तूरी चन्द्र गुग्गुलुसंयुतं । धूपं गृहाण वरद धूत पाप नमोस्तुते । ॐ महागणपतये नमः। धूपमाघ्रापयामि। धूपानन्त्रं आचमनियम् समर्पयामि। पुष्पैहि पूजयामि ॥**

--------------------- -----------------------------------------------------

## पञ्च हारति दीपं Pancha hArathy dEpam*(we can show deepam with 5 wicks)*

ॐ। पञ्चं हूतो हुवै नामैषः । तं वा एतं पञ्चं हूतऽ सन्तमं' । पञ्चंहोतेत्याचंक्षते परोक्षेण । परोक्षंप्रिया इव हि देवाः ॥ ॐ महागणपतये नमः |नमः पञ्च हारति दीपं दर्शयामि दीपानन्त्रं आचमनियम् समर्पयामि पुष्पैहि पूजयामि ॥

--------------------- -----------------------------------------------------

## गायत्री दीपं GAyathri dEpam *(we can show kumba harathy or Eka harathy or plate harathy)*

गायत्रो वै पर्णः । गायत्राः पशवः। तस्मात् त्रीणिं त्रीणिं । पर्णस्य पलाशानिं । त्रिपदां गायत्री ॥ ॐ महागणपतये नमः |गायत्री दीपं दर्शयामि दीपानन्त्रं आचमनियम् समर्पयामि पुष्पैहि पूजयामि ॥

--------------------- -----------------------------------------------------

## एक हारति दीपं **(Some manthras manadatory)** Eka hArathy dEpam *(simple deepam with 1 wick)*

ब्राह्मणोंऽस्य मुखंमासीत् । बाहू रांजन्यः कृतः। ऊरू तदंस्य यद्वैश्यः । पद्भ्याः शूद्रो अंजायत।

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

उद्दीप्यस्व जातवेदोऽपघ्नन्निर्‌ऋतिं ममं । पशूऽश्च मह्यमावंह जीवंनं च दिशों दिश । मांनो हिऽसीज्जातवेदो गामश्वं पुरुषं जगंत् । अबिंभ्रदग्न आगंहि श्रिया मा परिंपातय ॥

साज्यं त्रिवर्ति संयुक्तं वह्निना योजितुं मया |गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापहम् ||
भक्त्या दीपं प्रयश्चामि देवाय परमात्मने |त्राहि मां नरकात् घोरात् दीपं ज्योतिर् नमोस्तुते ||
**दीपं गृहाण देवेशवर्तित्रय समन्वितम् अन्धकारे नमस्तुभ्यं अज्ञानं विनिवर्तय । ॐ महागणपतये नमः |नमः एक हारति दीपं दर्शयामि दीपानन्तं आचमनियम् समर्पयामि पुष्पैहि पूजयामि ॥**

--------------------- ---------------------------------------------------

**नक्षत्र हारति दीपं (अलङ्कार दीपं)** Nakshatra hArathy dEpam (*this is 3 or 5 tier or 7 tier alankara deepam*)

ॐ स॒हस्र॑शीर्षा॒ पुरु॑षः । स॒ह॒स्रा॒क्षः स॒हस्र॑पात् ।स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा । अत्य॑तिष्ठद्दशाङ्गु॒लम्

ॐ ॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

भूरित्य॒ग्नौ प्रति॑तिष्ठति । भुव॒ इति॑ वा॒यौ । सुव॒रित्या॑दि॒त्ये । मह॒ इति॒ ब्रह्म॑णि । आ॒प्नोति॒ स्वारा॑ज्यम् । आ॒प्नोति॒ मनस॒स्पति॑'म् । वाक्प॑ति॒श्चक्षु॑ष्पतिः । श्रोत्र॑पति - र्वि॒ज्ञान॑पतिः । ए॒तत्त॑तो भवति । आ॒का॒श - श॑रीरं॒ ब्रह्म॑ । स॒त्यात्म॑ -प्रा॒णारामं॒ मन॑ आनन्दम्। शान्ति॑ समृद्ध -म॒मृतम्॑'॥ इति प्राचीनयो॒ग्योपा॑'स्व ॥

**ॐ महागणपतये नमः |नक्षत्र हारति दीपं दर्शयामि दीपानन्तं आचमनियम् समर्पयामि पुष्पैहि पूजयामि ॥**

--------------------- ---------------------------------------------------

पूर्णकुम्भ दीपः (pUrna kumba dEpa arAdhanA)

वैराग्य-तैलसम्पूर्णे भक्तिवर्ति-समन्विते । प्रबोधपूर्ण-पात्रे तु ज्ञप्ति-दीपं विलोकयेत् ॥

पूर्ण॒मदः॒ पूर्ण॒मिदं॒ पूर्णा॒त् पूर्ण॒ मुद॒च्यते । पूर्ण॒स्य पूर्ण॒मादा॒य पूर्ण॒मेवावशि॒ष्यते ॥ ॐ महागणपतये नमः |नमः पूर्णकुम्भ दीपं प्रदर्शयामि दीपानन्तं आचमनियम् समर्पयामि पुष्पैहि पूजयामि ॥

--------------------- ---------------------------------------------------

**नैवेद्यं** (**Mandatory**) NaivEdhyam

च॒न्द्रमा॒ मन॑सो जा॒तः । चक्षो॒ः सूर्यो॑ अजायत । मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ । प्रा॒णाद्वा॒युर॑जायत ।

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

ॐ भूर्भुव॒स्सुवः॑ तत्सवि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि धियो॒ यो नः॑ प्रचो॒दया॑त् ॥ **देव सवितः प्रसुव** । स॒त्यं त्व॒र्तेन॒ परि॑षिञ्चा॒मि ॥

अ॒मृतो॒प॒स्तर॑णमसि ॥ ॐ प्रा॒णाय॒ स्वाहा॑ । ॐ अ॒पा॒नाय॒ स्वाहा॑ । ॐ व्या॒नाय॒ स्वाहा॑ ।

ॐ उ॒दा॒नाय॒ स्वाहा॑ । ॐ स॒मा॒नाय॒ स्वाहा॑ । ॐ ब्रह्म॑णे स्वा॒हा ॥

शाल्यन्नं पायसं क्षीरं लड्डुकान् मोदकानपि **फलानि च**। **निवेद्यं संगृहानेश नित्य तृप्त नमोस्तुते**

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

**ॐ महागणपतये नमः |**। **महा** नैवेद्यं समर्पयामि

मध्ये मध्ये अ॒मृता॒पि॒धा॒नम॑सि । उत्तरापोशनं समर्पयामि ।

**अमृता पिधा नमसि** हस्तप्रक्षाळनं समर्पयामि । पादप्रक्षाळनं समर्पयामि ।

आचमनीयमाचम्नीयं समर्पयामि । **पुष्पैहि पूजयामि** ॥

--------------------- ----------------------------------------------------

## महा फलं

इदं फलं मयादेव स्थापितं पुरतस्तव |तेन मे सफलावाप्तिर्भवेत् जन्मनि जन्मनि ||

ॐ महागणपतये नमः।महाफलं समर्पयामि |

--------------------- ----------------------------------------------------

## फलाष्टक

कूष्मान्ड मातुलिङ्गं च कर्कठी दाडिमी फलम् |रम्बा फलं जम्बीरं बदरं तथा ||

ॐ महागणपतये नमः फलाष्टकं समर्पयामि ||

--------------------- ----------------------------------------------------

## करोद्वर्तनम्

करोद्वर्तनकं देवमया दत्तं हि भक्तितः |चारु चंद्र प्रभां दिव्यं गृहाण जगदीश्वर ||

ॐ महागणपतये नमः । करोद्वर्तनार्थे चंदनं समर्पयामि ||

--------------------- ----------------------------------------------------

## ताम्बूलं **Mandatiory** ThAmbUlam

नाभ्या॑ आसीद॒न्तरि॑क्षम् । शी॒र्ष्णो द्यौः सम॑वर्तत । प॒द्भ्यां भूमि॒र्दिश॒ः श्रोत्रा॑त् ।तथा॑ लो॒काꣳ अ॑कल्पयन्।

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥पूगीफल **समायुक्तं नागवल्ली दलैर्युतम् कर्पूर चूर्ण संयुक्तं ताम्बूलं प्रतिगृह्यतां**

**ॐ महागणपतये नमः । कर्पूर ताम्बूलं** समर्पयामि ॥

-------------------- ------------------------------------------------

## कर्पूर हारति दीपं नीराजनं **Mandatiory** [nErAjanam (KarpUra hArathy)]

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे ।

सर्वाणि रूपाणि विचित्य धीरः ।नामानि कृत्वाऽभिवदन् यदास्ते ।

यः शुचिः प्रयतो भूत्वा जुहुयादाज्य मन्वहम् ।श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥

पद्मानने पद्म ऊरू पद्माक्षी पद्मसम्भवे ।त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहम् ॥

सोमो वा एतस्य राज्यमादत्ते । यो राजा सन् राज्यो वा सोमेन यजते । देवसुवामेतानि हवीꣳषि भवन्ति । एतावन्तो वै देवानाꣳ सवाः । त एवास्मै सवान् प्रयच्छन्ति । त एनं पुनस्सुवन्ते राज्याय । देवसू राजा भवति ॥

साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठिकं राज्यं महाराज्यमाधिपत्यम् ॥

यो वै तां ब्रह्मणो वेद । अमृतेनावृतां पुरीम् ।
तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजां ददुः ।

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं ।। **ॐ महागणपतये नमः कर्पूर नीराजन दीपं दर्शयामि । नीरजानन्तं आचमनियम् समर्पयामि । पुष्पैहि पूजयामि ॥**

-------------------- ------------------------------------------------

## षोडश उपचार पूजा

धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते।

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम् ॥

छत्रं धारयामि । चामरं वीजयामि । गीतं श्रावयामि । वाद्यं घोषयामि ।

नृत्तं दर्शयामि । आन्दोलिकामारोपयामि । अश्वमारोपयामि । गजमारोपयामि

रथमारोपयामि ध्वजारोहणं समर्पयामि ॥

**ॐ महागणपतये नमः** । समस्त मन्त्र **उ**पचार, **पूजां** समर्पयामि ॥

समस्त शक्थि उपचार, पूजां समर्पयामि ॥

समस्त राजोपचार, पूजां समर्पयामि ॥

समस्त देवोपचार, पूजां समर्पयामि ॥

समस्त भक्त्युपचाराञ्च पूजां समर्पयामि ॥

--------------------- ----------------------------------------------------

## हारति HArathy

*Typically ladies can sing a traditional harathy song*

--------------------- ----------------------------------------------------

## मन्त्र पुष्पं (Some manthraas mandatory) Manthrapushpam

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः।तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।

ते ह॒ नाकं॑ महि॒मानः॑ सचन्ते । यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ।

अश्वदायी गोदायी धनदायी महाधने। धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥

पद्मानने पद्म **विमद्मपत्रे** पद्मप्रिये पद्मदलायताक्षि ।

विश्वप्रिये विष्णु मनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व।

पुत्रपौत्र धनं धान्यं हस्त्यश्वादिगवे रथम् ।

प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥

ॐ महादेव्यै च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥

श्रीवर्चस्यमायुष्यमारोग्यमाविधात् पवमानं महीयते ।

धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

योऽ॑पां पुष्पं॒ वेद॑। पुष्प॑वान् प्र॒जावा॑न् पशु॒मान् भ॑वति । च॒न्द्रमा॒ वा अ॒पां पुष्प॑म्। पुष्प॑वान् प्र॒जावा॑न् पशु॒मान् भ॑वति । य ए॒वं वेद॑ । योऽ॑पामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। अ॒ग्निर्वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। योऽ॑ग्नेरा॒यत॑नं॒ वेद॑ ॥ ॥

आयतंनवान् भवति। आपो वा अग्नेरायतंनम् । आयतंनवान् भवति। य एवं वेदं। योंऽपामायतंनं वेदं।
आयतंनवान् भवति। वायुर्वा अपामायतंनम्। आयतंनवान् भवति। वायोरायतंनं वेदं। आयतंनवान्
भवति ॥

आपो वै वायोरायतंनम्। आयतंनवान् भवति ।य एवं वेदं । योंऽपामायतंनं वेदं । आयतंनवान् भवति।
असौ वै तपंन्नपामायतंनम्। आयतंनवान् भवति। योंऽमुष्य तपंत आयतंनं वेदं। आयतंनवान् भवति।
आपो वा अमुष्य तपंत आयतंनम् ॥

आयतंनवान् भवति। य एवं वेदं। योंऽपामायतंनं वेदं। आयतंनवान् भवति। चन्द्रमा वा अपामायतंनम्
। आयतंनवान् भवति । यश्चन्द्रमंस आयतंनं वेदं । आयतंनवान् भवति । आपो वै चन्द्रमंस
आयतंनम्। आयतंनवान् भवति ॥

य एवं वेदं। योंऽपामायतंनं वेदं। आयतंनवान् भवति। नक्षंत्राणि वा अपामायतंनम्। आयतंनवान्
भवति। यो नक्षंत्राणामायतंनं वेदं। आयतंनवान् भवति। आपो वै नक्षंत्राणामायतंनम्। आयतंनवान्
भवति। य एवं वेदं ॥

योंऽपामायतंनं वेद ं। आयतंनवान् भवति पुर्जन्यो वा अपामायतंनम्। आयतंनवान् भवति । यः
पुर्जन्यंस्यायतंनं वेदं । आयतंनवान् भवति ।आपो वै पुर्जन्यंस्याऽऽयतंनम्। आयतंनवान् भवति ।
य एवं वेदं । योंऽपामायतंनं वेदं ॥

आयतंनवान् भवति। संवत्सरो वा अपामायतंनम्। आयतंनवान् भवति। यस्संवत्सरस्यायतंनं वेदं।
आयतंनवान् भवति। आपो वै संवत्सरस्यायतंनम्। आयतंनवान् भवति। य एवं वेदं। योंऽप्सु नावं
प्रतिंष्ठितां वेदं। प्रत्येव तिंष्ठति ॥ ८४ ॥

राजाधिराजायं प्रसह्यसाहिनें । नमों वयं वैंश्रवणायं कुर्महे । स मे कामान् कामकामांय मह्यंम् ।
कामेश्वरो वैंश्रवणो दंदातु । कुबेरायं वैश्रवणायं । महाराजाय नमंः ॥

ॐ तत् ब्रह्म । ॐ तत् वायुह । ॐ तत् आत्मा । ॐ तत् सत्यं । ॐ तत् सर्वं । ॐ तत् पुरोर्नमह ।

अन्तस चरति भूतेषु गुहायां विश्व मुर्तिसु ।त्वं यज्ञस्त्वं वषट्कारस्त्वं इन्द्रस्त्वगं रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्वं
प्रजापतिः। त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवः ॐ

न कर्मणा न प्रजया धनेंन त्यागेंनैके अमृतत्वमंअनशुः । परेंण नाकं निहिंतं गुहांयां विभ्राजंदे यद्यतंयो
विशन्तिं । वेदान्तविज्ञान सुनिंश्चितार्थाः संन्यांस योगाद्यतंयः शुद्धसत्त्वांः । ते ब्रंह्मलोके तु परांन्तकाले

परा॑मृता॒त् परि॑मुच्यन्ति॒ सर्वे॑ । द॒ह्रं वि॒पा॒पं प॒रमे॓'श्मभू॒तं यत्पु॑ण्डरी॒कं पु॒रम॑ध्यस॒ꣳस्थम् । त॒त्रापि॒ द॒ह्रं ग॒गनं॑ विशोक॒ं तस्मि॑न् यद॒न्तस्तदुपा॑सित॒व्यम् । यो वेदादौ स्व॑रः प्रो॒क्तो॒ वे॒दान्ते॑ च प्र॒तिष्ठि॑तः । तस्य॑ प्र॒कृति॑लीन॒स्य॒ य॒ः पर॑ः स मह॒ेश्वर॑ः ॥

ॐ महागणपतये नमः । । मन्त्र पुष्पं समर्पयामि ॥

--------------------- -----------------------------------------------------

## प्रदक्षिणं Pradakshinam

नाभ्या॑ आसीद॒न्तरि॑क्षम् । शी॒र्ष्णो द्यौः सम॑वर्तत ।प॒द्भ्यां भूमि॒र्दिश॒ः श्रोत्रा॓त् ।

तथा॑ लो॒काꣳ॒ग्ं॒अ॑कल्पयन्।

आ॒र्द्रां य॒ः करि॑णीं य॒ष्टिं पि॒ङ्ग॒लां प॑द्ममा॒लिनीम् । च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥

यानि कानि च पापानि जन्मान्तर कृतानि च ।तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

ॐ महागणपतये नमः । । प्रदक्षिणान् समर्पयामि ॥

--------------------- -----------------------------------------------------

## नमस्कारं NamaskAram

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः।तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।

ते ह॒ नाकं॑ महि॒मान॑ः सचन्ते । यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ।

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।

यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥

. तस्मात्कारुण्यभावेन रक्ष रक्ष गुहेश्वर ॥

ॐ महागणपतये नमः ।।|नमस्कारान् समर्पयामि ॥

नमः सर्व हितार्थाय जगदाधार हेतवे | साष्टाङ्गोयं प्रणामस्ते प्रयत्नेन मया कृतः ||

ऊरुसा शिरसा दृष्ट्वा मनसा वाचसा तथा | पद्भ्यां कराभ्यां जानुभ्यां प्रणामोष्टाङ्गं उच्यते ||

शाठ्येनापि नमस्कारान् कुर्वतः शार्ङ्ग पाणये | शत जन्मार्चितं पापं तत्क्षणतेव नश्यति || *(this defines saashtaangha namaskaram all parts of body listed)*

ॐ महागणपतये नमः । नमस्कारान् समर्पयामि ||

--------------------- -----------------------------------------------------

## प्रार्थना (prarthana)

पुत्रान् देहि यशो देहि विद्यां देहि संपदं देहि शाश्वतीं । त्वयी भक्तिं च मे देहि । परत्रच पराङ्गतिं

अनेकजन्मसम्प्राप्त कर्मबन्धविदाहिने । आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः ॥

ज्ञानं देहि यशो देहि विवेकं बुद्धिमेव च । वैराग्यं च शिवां विद्यां निर्मलां भक्तिमन्वहम् ॥

(ॐ महागणपतये नमः । नमः । इति प्रार्थना ॥

DETAILED PRARTHANA:

श्रीम् गम् सौभाग्य गणपतये वर्वर्द सर्वजनं में वश मानाय नमः॥
अनन्तविभायैव परेषां पररुपिणे। शिवपुत्राय देवाय गुहाग्रजाय ते नमः॥
अनामयाय सर्वाय सर्वपूज्याय ते नमः। सगुणाय नमस्तुभ्यं ब्रह्मणे निर्गुणाय च॥
अनेककोटिब्रह्माण्डनायकं जगदीश्वरम्। अनन्तविभवं विष्णु मयूरेशं नमाम्यहम्॥
अमेयाय च हेरम्ब परशुधारकाय ते। मूषक वाहनायैव विश्वेशाय नमो नमः॥
अम्बिकाहृदयानन्दं मातृभिः परिवेष्टितम्। भक्तिप्रियं मदोन्मत्तं वन्देऽहं गणनायकम्॥
एकदंताय विद्महे। वक्रतुण्डाय धीमहि।तन्नो दंती प्रचोदयात।।
एकदन्तं महाकायं तप्तकाञ्चनसन्निभम्। लम्बोदरं विशालाक्षं वन्देऽहं गणनायकम्॥
एकदन्तं महाकायं लम्बोदरगजाननम्। विध्ननाशकरं देवं हेरम्बं प्रणमाम्यहम्॥
एकदन्ताय शुद्घाय सुमुखाय नमो नमः। प्रपन्न जनपालाय प्रणतार्ति विनाशिने॥
किं स्तौमि त्वां गणाधीश योगशान्तिधरं परम्। वेदादयो ययुः शान्तिमतो देवं नमाम्यहम्॥
केयूरिणं हारकिरीटजुष्टं चतुर्भुजं पाशवराभयानिं। सृणिं वहन्तं गणपं त्रिनेत्रं सचामरस्त्रीयुगलेन युक्तम्॥
गजराजमुखाय ते नमो मृगराजोत्तमवाहनाय ते। द्विजराजकलाभृते नमो गणराजाय सदा नमोऽस्तु ते॥
गजवक्त्रं सुरश्रेष्ठं कर्णचामरभूषितम्। पाशाङ्कुशधरं देवं वन्देऽहं गणनायकम्॥
गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारु भक्षणम्। उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम्॥
गजाननाय पूर्णाय साङ्ख्यरूपमयाय ते। विदेहेन च सर्वत्र संस्थिताय नमो नमः॥
गजाननाय महसे प्रत्यूहतिमिरच्छिदे। अपारकरुणापूरतरङ्गितदृशे नमः।।
गजाननाय विद्महे, वक्रतुण्डाय धीमहि, तन्नो दंती प्रचोदयात्।।

गणनाथ गणेश विघ्नराट् शिवसूनो जगदेकसद्गुरो। सुरमानुषगीतमद्यशः प्रणतं मामव संसृतेर्भयात्॥
गणानां त्वा शौनको घृत्समदो गणपतिर्जगति गणपत्यावाहने विनियोगः ||
गुरुदराय गुरवे गोप्त्रे गुह्यासिताय। गोप्याय गोपिताशेषभुवनाय चिदात्मने॥
चित्ररत्नविचित्राङ्गं चित्रमालाविभूषितम्। कायरूपधरं देवं वन्देऽहं गणनायकम्॥
चौरवद्भोगकर्ता त्वं तेन ते वाहनं परम्। मूषको मूषकारूढो हेरम्बाय नमो नमः॥
जगद्रूपो गकारश्च णकारो ब्रह्मवाचकः। तयोर्योगे गणेशाय नाम तुभ्यं नमो नमः॥
जननीजनकसुखप्रदो निखलानिष्ठहरोऽखिलेष्टदः। गणनायक एव मामवेद्रदपाशाङ्कुमोदकान् दधत्॥
जय विघ्नकृतामाद्या भक्तनिर्विघ्नकारक। अविघ्न विघ्नशमन महाविघ्नैकविघ्नकृत्॥
जय सिद्धिपते महामते जय बुद्धीश जडार्तसद्गते। जय योगिसमूहसद्गुरो जय सेवारत कल्पनातरो॥
तमः स्तोमहारनं जनाज्ञानहारं त्रयीवेदसारं परब्रह्मसारम्। मुनिज्ञानकारं विदूरेविकारं सदा ब्रह्मरुपं गणेशं नमामः॥
तमोयोगिनं रुद्ररूपं त्रिनेत्रं जगद्धारकं तारकं ज्ञानहेतुम्। अनेकागमैः स्वं जनं बोधयन्तं सदा सर्वरूपं गणेशं नमामः॥
द्धिरदवदन विषमरद वरद जयेशान शान्तवरसदन। सदनवसादन सादनमन्तरायस्य रायस्य॥
द्वविमौ ग्रसते भूमिः सर्पो बिलशयानिवं। राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम्॥
नमस्ते गणनाथाय गणानां पतये नमः। भक्तिप्रियाय देवेश भक्तेभ्यः सुखदायक॥
नमस्ते योगरूपाय सम्प्रज्ञातशरीरिणे। असम्प्रज्ञातमूर्ध्ने ते तयोर्योगमयाय च॥
नमामि देवं द्धिरदाननं तं यः सर्वविघ्नं हरते जनानाम्। धर्मार्थकामांस्तनुतेऽखिलानां तस्मै नमो विघ्नविनाशनाय॥
नमामि देवं सकलार्थदं तं सुवर्णवर्णं भुजगोपवीतम्। गजाननं भास्करमेकदन्तं लम्बोदरं वारिभावसनं च॥
नमो नमो गणेशाय नमस्ते शिवसूनवे। निर्विघ्नं कुरु मे देवेश नमामि त्वां गणाधिप॥
नमो विघ्नराजाय सर्वसौख्यप्रदायिने। दुष्टारिष्टविनाशाय पराय परमात्मने॥
परात्परं चिदानन्दं निर्विकारं हृदि स्थितम्। गुणातीतं गुणमयं मयूरेशं नमाम्यहम्॥
पार्वतीनन्दनायैव देवानां पालकाय ते। सर्वेषां पूज्यदेहाय गणेशाय नमो नमः॥
पुराणपुरुषं देवं नानाक्रीडाकरं मुद्रा। मायाविनां दुर्विभावयं मयूरेशं नमाम्यहम्॥
प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्। भक्तावासं स्मरेन्नित्यं आयुःकामार्थसिद्धये॥

प्रातः स्मरामि गणनाथमनाथबन्धुं सिन्दूरपूरपरिशोभितगण्डयुगमम् उद्दण्डविघ्नपरिखण्डनचण्डदण्ड माखण्डलादिसुरनायकवृन्दवन्द्यम्॥
ब्रह्मभ्यो ब्रह्मदात्रे च गजानन नमोऽस्तु ते। आदिपूज्याय ज्येष्ठाय ज्येष्ठराजाय ते नमः॥
महाकर्णाय विद्महे, वक्रतुण्डाय धीमहि, तन्नो दंती प्रचोदयात्।।
मात्रे पित्रे च सर्वेषां हेरम्बाय नमो नमः। अनादये च विघ्नेश विघ्नकर्त्रे नमो नमः॥
मायातीताय भक्तानां कामपूराय ते नमः। सोमसूर्याग्निनेत्राय नमो विश्वम्भराय ते॥
मायासिद्धिस्तथा देवो मायिको बुद्धिसंज्ञितः। तयोर्योगे गणेशान त्वं स्थितोऽसि नमोऽस्तु ते॥
मूषिकोत्तममारुह्य देवासुरमहाहवे। योद्धुकामं महावीर्यं वन्देऽहं गणनायकम्॥
मौञ्जीकृष्णाजिनधरं नागयज्ञोपवीतिनम्।बालेन्दुशकलं मौलौ वन्देऽहं गणनायकम्॥
यतो बुद्धिरज्ञाननाशो मुमुक्षोः यतः सम्पदो त्रैलोक्यपालन विभो विश्वव्यापिन् नमो नमः॥
योगाकाराय सर्वेषां योगशान्तिप्रदाय च। ब्रह्मेशाय नमस्तुभ्यं ब्रह्मभूतप्रदाय ते॥
रत्नसिंहासनस्थम्। दोर्भिः पाशांकुशेष्टाभयधृतिविशदं चंद्रमौलिं त्रिनेत्रम्।ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्री समेतं प्रसन्नम्॥१॥
लम्बोदरं महावीर्यं नागयज्ञोपशोभितम्। अर्धचन्द्रधरं देवं विघ्नव्यूहविनाशनम्॥
लम्बोदराय वै तुभ्यं सर्वोदरगताय च। अमायिने च मायाया आधाराय नमो नमः॥
वक्र तुंड महाकाय, सूर्य कोटि समप्रभः। निर्विघ्नं कुरु मे देव शुभ कार्येषु सर्वदा॥
वक्रतुण्ड महाकाय कोटि सूर्य समप्रभा। निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा॥
वामाङ्गे भ्रान्तिरूपा ते सिद्धिः सर्वप्रदा प्रभो। भ्रान्तिधारकरूपा वै बुद्धिस्ते दक्षिणाङ्गके॥
विघ्नेश्वर महाभाग सर्वलोकनमस्कृत।मया ऽऽरब्धमिदं कार्यं निर्विघ्नं कुरु सर्वदा॥
विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धितायं। नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥
विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् | सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ||
विश्वमूलाय भव्याय विश्वसृष्टिकराय ते। नमो नमस्ते सत्याय सत्यपूर्णाय शुण्डिने॥
वेदान्तवेद्यं जगतामधीशं देवादिवन्द्यं सुकृतैकगम्यम्। स्तम्बेरमास्यं नवचन्द्रचूडं विनायकं तं शरणं प्रपद्ये॥
सर्वमंगल मांगल्ये शिवे सर्वार्थ साधिके | शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते ||
सर्वविघ्नहरं देवं सर्वविघ्नविवर्जितमम् सर्वसिद्धिप्रदातारं वन्देऽहं गणनायकम्॥
सर्वशक्तिमयं देवं सर्वरूपधरं विभुम्।सर्वविद्याप्रवक्तारं मयूरेशं नमाम्यहम्॥

सर्वाज्ञाननिहन्तारं सर्वज्ञानकरं शुचिम्। सत्यज्ञानमयं सत्यं मयूरेशं नमाम्यहम्॥
सिद्धिबुद्धि पते नाथ सिद्धिबुद्धिप्रदायिने।मायिन मायिकेभ्यश्च मोहदाय नमो नमः॥
सृजन्तं पालयन्तं च संहरन्तं निजेच्छया। सर्वविघ्नहरं देवं मयूरेशं नमाम्यहम्॥
स्वनन्दवासिने तुभ्यं शिवस्य कुलदैवत। विष्णवादीनां विशेषेण कुलदेवताय ते नमः॥
ह्रीं विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय॥नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥१॥
ह्रीं श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणै: पूजितं श्वेतगन्धैः, क्षीराब्धौ रत्नदीपै:सुरतरविमले
ॐ महागणपतये नमः। प्रार्थनं समर्पयामि।
======================= ===================================================

# अर्घ्य प्रदानं Argya pradhAnam Offer ARgyam for Navagraha dEvatha, Makshatra dEvatha and Kula dEvatha

Balagurunath swami

अद्य पूर्वोक्त विशेषण विशिष्टायां अस्यां शुभतिथौ ॐ महागणपतये नमः । प्रसादसिद्ध्यर्थं, पूजान्ते क्षीरार्घ्यप्रदानं उपायनदानं च करिष्ये" इति सङ्कल्प्य ।

। इदमर्घ्यं प्रदास्यामि सुप्रीतो भव सर्वदा ॥ ॐ महागणपतये नमः । इदमर्घ्यमिदमर्घ्यमिदमर्घ्यं ।

वल्लीश पार्वतीपुत्र व्रतसम्पूर्तिहेतवे । इदमर्घ्यं प्रदास्यामि प्रसीद शिखिवाहन ॥ ॐ महागणपतये नमः । । इदमर्घ्यमिदमर्घ्यमिदमर्घ्यं॥

देव सेनापते स्वामिन् सेनानिरखिल्ष्टद । इदं अर्घ्यम् प्रदास्यामि सुप्रेतो भव सर्वदा । ॐ महागणपतये नमः । इदमर्घ्यमिदमर्घ्यमिदमर्घ्यं

रोहिणीश महाभाग सोमसोम विभूषण । इदमर्घ्यं प्रदास्यामि सुप्रीतो भवसर्वदा ॥ ॐ महागणपतये नमः । इदमर्घ्यमिदमर्घ्यमिदमर्घ्यं ।

चन्द्रात्रेय महाभाग सोम सोम सोमविभुषण । इदमर्घ्यं प्रदास्यामि सुप्रीतो भवसर्वदा ॥ रोहिणी सहित चन्द्राय नमः ॐ महागणपतये नमः ।)। इदमर्घ्यमिदमर्घ्यमिदमर्घ्यं ।

नीलकण्ठ महाभाग कार्तिकेयस्य वाहन इदमर्घ्यं प्रदास्यामि प्रसीद शिखिवाहन ॥ ॐ महागणपतये नमः । स्वामिने नमः । इदमर्घ्यमिदमर्घ्यमिदमर्घ्यं ।

अन्येन मया कृतेन यथाज्ञेन यथाशक्त्या यथामिलितोपचार द्रव्यैः पूजन, अर्घ्यप्रदानेन च भगवान् सर्वात्मकः **ॐ महागणपतये नमः** । सुप्रीतः सुप्रसन्नो वरदो भवतु ॥
======================= ===================================================

**स्तुति** Sthuthi Paryer

*Some people can sing some songs on Lord Gurunatha:*

=======================      =================================================

## शङ्ख ब्रमण

**(make three rounds of sha.nkha with water like aarati and pour down;chant OM 9 times and show mudras**

इमां आपशिवतम इमं सर्वस्य भेषजे | इमां राष्ट्रस्य वर्धिनि इमां राष्ट्र भ्रतोमत ||

=======================      =================================================

## तीर्थ ThEertham [PAdhOdakam (pAda udakam)]:

*Take the water from the kumbam / kalasam / panch pathra and give theertham to each person assembled 3 times. If priest is present, he must give.Otherwise eldest person should give. The manthra to be chanted while giving to males / females given below:*

MALES:

अकाल मृत्यु हरणं सर्वव्याधि निवारणं । सर्वपापक्षयकरं बाल गुरुनाथ स्वामिपादोदकं शुभं ॥

FEMALES:

आमयावी चिन्वीत । आपो वै भेषजं । भेषजमेवास्मै करोति । सर्वमायुरेति ॥

=======================      =================================================

## क्षमापणम् KshamApanam

*Seeking forgiveness for any omissions and commissions and prayoing God to make the duty discharged, pUja done perfect in all sense with divine grace*

यदक्षर पदभ्रष्टं मात्रा हीनन्तु यद्भवेत् । तत्सर्वं क्षम्यतां देव शिवसूनु नमोऽस्तुते ॥

विसर्ग बिन्दु मात्राणि पद पादाक्षराणि च । न्यूनानिचातिरिक्तानि क्षमस्व पुरुषोत्तम ॥

यस्य स्मृत्या च नामोक्त्या तपः कार्याक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर । यत्पूजितं मयादेव परिपूर्णं तदस्तु मे ॥

अपराध सहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयं इति मां मत्वा क्षमस्व पुरुषोत्तम ॥

आवाहनं न जानामि न जानामि विसर्जनम् । पुजाविधिं न जानामि क्षमस्व गुरुसत्तम ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन रक्ष रक्ष जगद्गुरो ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम॥

यस्य स्मृत्या च नामोक्त्या तपः पूजा कृयादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

मध्ये मन्त्र तन्त्र स्वर वर्ण ध्यान नियम न्यूनातिरिक्त लोपदोष प्रायश्चित्तार्थं नामत्रयजपमहं करिष्ये ॥

ॐ अच्युताय नमः ॐ अनन्ताय नमः ॐ गोविन्दाय नमः [त्रिः]

ॐ अच्युतानन्तगोविन्देभ्यो नमो नमः ॥

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

**ॐ महागणपतये नमः । अर्पण मस्तु ॥**

========================= ======================================================

## शान्तिः मन्त्रः

*Typically all present must chant shanthi manthram together. Could be led by priest*

**ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥**

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा। शं नो इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीत् वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः । व्यशेम देवहितं यदायूः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो वृहस्पतिर्दधातु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ वाङ्मे॒ मन॑सि॒ प्रति॑ष्ठिता॒ मनो॑ मे॒ वाचि॒ प्रति॑ष्ठितमा॒विरा॒वीर्म॑ एधि वे॒दस्य॑ म॒ आणी॑स्थः श्रु॒तं मे॒ मा प्रहा॑सीर॒नेना॒धीते॑नाहोरा॒त्रान् सन्द॑धाम्यृ॒तं व॑दिष्यामि स॒त्यं व॑दिष्यामि॒ तन्माम॑वतु॒ तद्व॒क्तार॑मव॒त्वव॑तु॒ मामव॑तु व॒क्तार॒मव॑तु व॒क्तारम्॑ ॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ नमो॒ ब्रह्म॑णे॒ नमो॑ अस्त्व॒ग्नये॒ नम॑ः पृथि॒व्यै नम॒ ओष॑धीभ्यः।नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ विष्ण॑वे बृह॒ते क॑रोमि॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ तच्छं॒ योरावृ॑णीमहे । गा॒तुं य॒ज्ञाय॑ । गा॒तुं य॒ज्ञप॑तये। दैवी॑स्स्व॒स्तिर॑स्तु नः । स्व॒स्तिर्मानु॑षेभ्यः। ऊ॒र्ध्वं जि॑गातु भेष॒जम् । शन्नो॑ अस्तु द्वि॒पदे॑ । शं चतु॑ष्पदे ॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ नमो॑ वा॒चे या चो॑दि॒ता या चानु॑दिता॒ तस्यै॑ वा॒चे नमो॒ नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नम॒ ऋषि॑भ्यो मन्त्र॒कृद्भ्यो॒ मन्त्र॑पतिभ्यो॒ मामामृष॑यो मन्त्र॒कृतो॑ मन्त्र॒पत॑य॒ः परा॑दु॒र्मा ऽहमृषी॑न्मन्त्र॒कृतो॑ मन्त्र॒पती॒न्परा॑दां वैश्वदे॒वीं वाच॑मुद्यासग्ं शि॒वामद॑स्ता॒ं जुष्टा॑ं दे॒वेभ्य॒ः शर्म॑ मे॒ द्यौः शर्म॑पृथि॒वी शर्म॒ विश्व॑मि॒दं जग॑त् । शर्म॑ च॒न्द्रश्च॒ सूर्य॑श्च॒ शर्म॑ ब्रह्मप्रजाप॒ती । भूतं व॑दिष्ये॒ भुव॑नं वदिष्ये॒ तेजो॑ वदिष्ये॒ यशो॑ वदिष्ये॒ तपो॑ वदिष्ये॒  ब्रह्म॑ वदिष्ये स॒त्यं व॑दिष्ये॒ तस्मा॑ अ॒हमि॒दमु॑प॒स्तर॑ण॒मुप॑स्तृण उप॒स्तर॑णं मे प्र॒जायै॑ पशू॒नां भू॑यादुप॒स्तर॑णम॒हं प्र॒जायै॑ पशू॒नां भू॑यास॒ं प्राणा॑पानौ मृ॒त्योर्मा॑पात॒ं प्राण॑पानौ॒ मा मां हासिष्ट॑ं मधु॑ मनिष्ये॒ मधु॑जनिष्ये॒ मधु॑ वक्ष्यामि॒ मधु॑ वदिष्यामि॒ मधु॑मतीं दे॒वेभ्यो॒ वाच॑मुद्यासग्ं॒शुश्रू॒षेण्या॑ं मनु॒ष्ये॑भ्य॒स्तं मा॑ दे॒वा अ॑वन्तु शो॒भायै॑ पि॒तरोऽनु॑मदन्तु ॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः | सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ||

स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः | गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ||

ॐ मधु॒वाता॑ ऋताय॒ते । मधु॑क्षरन्ति॒ सिन्ध॑वः । माध्वी॑र्नः स॒न्त्वोष॑धीः । मधु॒नक्त॑मु॒तोषसि । मधु॑म॒त् पार्थि॑व॒ꣳरजः । मधु॒द्यौर॑स्तु नः पि॒ता । मधु॑मान्नो॒ वन॒स्पतिः । मधु॑माꣳ अस्तु॒ सूर्यः । माध्वी॒र्गावो॑ भवन्तु नः ॥ ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यंबकाय त्रिपुरान्तकाय त्रिकाग्नि-कालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

ॐ वाङ् मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् । आविरावीर्म एधि । वेदस्य म आणीस्थः । श्रुतं मे मा प्रहासीः अनेनाधीतेनाहोरात्रान्सन्दधामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि ।तन्मामवतु ।तद्वक्तारमवतु ।अवतु माम् ।अवतु वक्तारामवतु वक्तारम् ॥ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृताँथ्सम्बभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरिविश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय । ॐ शान्तिः शान्तिः शान्तिः ॥

इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि श गं सिषद्विश्वेदेवाः सूक्तवाचः पृथिवीमातर्मा मा हि गं सीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यास गं शुश्रूषेण्यां म् मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ सदाशिवोम॥

स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः | गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ||

ॐ नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः ।

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः । ईशान-स्सर्व विद्याना-मीश्वर-स्सर्व भूतानां ब्रह्माऽधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ।ॐ भूर्भुवस्सु वरोम् । ॐ नमश्शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च

निधनपतये नमः । निधनपतान्तिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः । हिरण्याय नमः । हिरण्यलिङ्गाय नमः । सुवर्णाय नमः । सुर्वर्णलिङ्गाय नमः । दिव्याय नमः । दिव्यलिङ्गाय नमः । भवाय नमः । भवलिङ्गाय नमः । शर्वाय नमः । शर्वलिङ्गाय नमः । शिवाय नमः । शिवलिङ्गाय नमः । ज्वलाय नमः । ज्वललिङ्गाय नमः । आत्माय नमः । आत्मलिङ्गाय नमः । परमाय नमः । परमलिङ्गाय नमः । एतथ्सोमस्य सूर्यस्य सर्वलिङ्गगं स्थापयति पाणिमन्त्रं पवित्रम् ॥

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवे भवे नाति भवे भवस्व मां भवोद्भवाय नमः ॥
ॐ ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माऽधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥
ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥
ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥
तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥

ॐ द्यौः शान्तिरन्तरिक्षम् शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः | वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व गं म् शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि | ॐ शान्तिः शान्तिः शान्तिः |
॥ शिवेन मे सन्तिष्ठस्व स्योनेन मे सन्तिष्ठस्व ब्रह्मवर्चसेन मे सन्तिष्ठस्व यज्ञस्यर्द्धिमनुसन्तिष्ठस्वोप ते यज्ञ नम उप ते नम उप ते नमः ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पुर्णमुदच्यते पूर्णश्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

========================= =====================================================

**समर्पणम्** Samarpanam**:**

*Giving away the karmaphala to Lord and just accept HIS blessings*

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेःस्वभावात् ।

करोमि यद्यत्सकलं परस्मै श्री**मण् नारायणा**येति / **ॐ महागणपतये नमः** । समर्पयामि॥

========================= =====================================================

**आचार्य उपायन दानं** sambhaavana / dakshina – fees to be paid for services

ॐनमोऽस्त्वनंताय सहस्त्र मूर्तये , सहस्त्र पादक्षिशिरोरूबाहवे । सहस्त्र नाम्ने पुरुषाय शाश्वते , सहस्त्र कोटि युग धारिणे नमः ॥ नमो ब्रह्मण्य देवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ *(offer chandanam)*

**हिरण्यगर्भ गर्भस्तं हेमबीजं विभावसोः।अनन्त पुण्य फलतं अतः शान्तिं प्रयच्च** (इदं उपायनम्) **इदं आग्नेयं हिरण्यं सदक्षिणाकं सतांबूलं** | **ॐ महागणपतये नमः** । **दक्षिणां प्रदक्षिणां** समर्पयामि **॥**

========================= =====================================================

**आचार्य आसीर्वचनं स्रावयामि** *(let pundit chant aseervachanam and please listen)*

Manthraas to be chanted by ACHAARYA who conducts the pooja. IN the absence of AAcharya , you can imagne your own GURU, and keep AACHARYA Dakshina to be handed over when possible

A minimum of a few manthras as below are chanted

रोचनो रोचमान: शोभन: शोभामान: कल्याण:।शतमानं भवति शतायु: पुरुष:। शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति

ॐस्वस्ति न इन्द्रो वृद्धश्रवा : स्वस्ति न : पूषा विश्ववेदा : । स्वस्ति नस्तार्क्ष्यो अरिष्ट नेमि : स्वस्ति नो बृहस्पति र्दधातु ।

ऋ॒द्ध्यास्म॑ ह॒व्यैर्नम॑सो॒पसद्य॑। मि॒त्रं दे॒वं मि॑त्र॒धेयं॑ नो अस्तु। अ॒नू॒रा॒धान् ह॒विषा॑ व॒र्धयं॑न्तः। श॒तं जी॑वेम॒ श॒रद॒ः सवी॑राः।

नवो॑ नवो भवति॒ जाय॑मा॒नोऽह्ना॑ꣳ के॒तुरु॒षसा॑मे॒त्यग्रे॑। भा॒गं दे॒वेभ्यो॒ वि॑द॑धात्या॒यन् प्रच॒न्द्रमा॑ꣳस्तिरिति दी॒र्घमायु॑ः॥

श्रीवर्चस्यमायुष्यमारोग्यमाविधात् पवमानं महियते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

======================== ====================================================

# पुनःपूजनं Punahpooja

Usually done next day morning. Simple 21 opr 108 naamas chanted and deepam and nivedhanam

======================== ====================================================

# उद्वासनं Udhvaasanam Ceremonial send off

अनया पूजा **ॐ महागणपते** प्रीयताम् ॥

May the pooja deity be appeased with this worship. Give a drop of water on the plate.

अप उपस्पृश्य **ॐ महागणपतये नमः** । यथास्थानं प्रतिष्टापयामि । शोभनार्थे क्षेमाय पुनरागमनाय च ।

इति **ॐ महागणप तिम्** उद्वास्य ॥

*Just Move chithra patam / bimbam a bit symbolic to see HIM / HER dEVa or dEvathaa off to HIS / HER natural abode safely and requesting HIM / HER to come again when invoked.*